CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

ध्यावानस्तनतमवधूताऽखिलमलः॥ समुक्तो दुःखौघैरपगतजराक्लेशमरणो गुणाग्र्यो योपे
तः॥ गुरुरथ चिरंजीव तिऽवि॥ चतुर्विधायाकथितेह सृष्टिः प्रवर्त्तनियासकलाभिख्यस्त्वा
प्रलीयते वापि जगत्समयं कालाग्निरुद्रादिसदाशिवांतं॥ स्वयं मयोक्ता खलु योनिरुजा
वेधस्तु देवैरपि दुर्लभोऽस्याः॥ अनेन वंधेन न साध्यते यं न्यास्येव तत्साधकपुंगवस्य॥ सु
रतल्पनिषेवणांच मात्तं द्विजहत्यामथ नतः स्वर्णचौर्यं॥ अमुना विलयं प्रयाति सम्यक्
सकृदभ्यावरितेन वंधनेन॥ सतु मंत्रिवरः स एव योगी गुणसिद्धिपरमास्थितः स एव॥
अमुनाचरितेह वंधनं यः सततं सोचितधर्मकर्मनिष्ठः॥ अमुनाभवतीह देहभाजां सततभ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकृतेनवैधनेन। नजरापिनृराजवैजयंतीनचमृत्युःप्रतिपादिताचभीतिः। एतत्स्यैव
हिवैधनस्यमनुजःप्राप्नोतिसम्यकरुणादभ्यासादणिमादिसिद्धिमतुलांसंवित्तिमपु
र्जितां। योगेंद्वाप्रतिमंजपंचमरुतंकालस्यवावञ्चनंतद्विद्वानःपरमंपरात्परंपरंपति
पद्मसुरस्यशिति। पारमेश्वरतंत्रे। ईश्वरउवाच। पश्चिमाभिमुखंलिंगंयोनिस्थंपरिकी
र्त्तितं। हृद्विंदुविन्दुसंयुक्तंस्वयंभ्वाराणावाचकं। इतरंचांतरालस्थंविसर्गार्थंतथापरं
मसृणपवनेचातर्येङ्गपीठप्रकीर्त्तितं। कंदंवगोलकाकारंतकामंविंदुरूपिणाम्। ब्र
ह्मरंध्रंतुनत्रैवकुण्डलाधारमंडले। पृथिव्यादीनिरंध्राणिसप्तद्वारांणाचकानिच। मूला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं वं स्वं तत्त्वं कोदराः हृदयमध्यगं ॥ तदूर्द्ध्वे नादनामानं प्रधानं परिकीर्त्तितं ॥ कामरूपे
भवेच्छक्ति विसर्गमण्डलं प्रिये ॥ वंधं तस्याप्रवक्ष्यामि संविन्नित्यभ्रमन्ति यया ॥ आदौ
मूर्द्ध योगेन स्वाधारे योजयेत्पुनः ॥ गुदमध्यान्तरे योनिस्तामाकुंच्य प्रबोधयेत् ॥ भ्रम
द्योनिगतं ध्यात्वा कामं बन्धूकसंनिभं ॥ सूर्य्यकोटिप्रतीकाशं चंद्रकोटिसुशीत
लं ॥ तस्योर्द्ध्वे तु शिखासूक्ष्मा चिच्चित्रा पावकीकला ॥ तया सहितमात्मानमेकीभू
तं विचिन्तयेत् ॥ गच्छन्ती ब्रह्ममार्गेण लिंगत्रयक्रमेण तु ॥ अमृतं तद्विसर्गस्थं
परमानन्दलक्षणं ॥ उत्तं रक्तं स्वतेजाढ्यं धारापातैः प्रवर्षितं ॥ पीत्वा कुलामृतं दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वंऽथनरेवाविशोत्कृतं॥ ऽथनरेवाकुलंगच्छेत्मात्रायोगेन नान्यथा॥ साचप्राणास्समा
ख्याता अस्मिंस्तंत्रेमयोदिते॥ ऊर्द्ध्वशाद्धगतिःप्राणान्ध्वनिर्यस्मिन्प्रजायते॥ मा
मात्राजायतेभूयःउच्चारवशवर्त्तिनी॥ ऽङ्घातःप्रोच्यतेसोपिप्राणास्तत्पृश्यतेयदा॥
स्थवमस्यस्यमानस्यअहन्यहनिनिश्चयं॥ जरामरणदुःखोघैर्मुच्यतेभवबंधनात्
चतुर्विधातुयास्मृष्टिःयस्यांयोनौप्रवर्त्तते॥ ऽथनःप्रलीयतेयस्यांकालाग्न्यादिशिवां
तथा॥ योनिमुद्रापराह्येषाबंधस्तस्याःप्रकीर्त्तिता॥ तस्यास्तुबंधमात्रेणनत्वासिद्ध्यन्
ताधयेत॥ छिन्नारुद्धाश्चयेमंत्राःकीलितास्तंभिताश्चये॥ दग्धामत्ताःसिताद्दीनाम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ बो० वि० ॥ ॥ ११० ॥

तिना लुप्तिरस्कृताः ॥ ऽदीक्षिता धर्मसंयुक्ता ग्रामाः संमूर्छिता हि ॥ मंत्रा वालास्तहवृद्धायौ-
द्धा यौवनगर्विता ॥ अरिपक्षे स्थिता ये च निर्वीर्याः सत्त्ववर्जिता ॥ तथांशकेन हीनाश्च खंड-
शः तथा कृताः ॥ विधिनानेन संयुक्ताः प्रभवंत्यचिरेण तु ॥ सिद्धिमोक्षप्रदाः सर्वे गुरुणा वि-
नियोजिताः ॥ यद्यदुच्चरते मंत्री मंत्ररूपं शुभाशुभं ॥ तत्तु सिद्ध्यत्यनायासात् शोधनान्निर्वं-
धनात् ॥ दीक्षयित्वा विधानेन अभिषिंच्य सहस्रधा ॥ ततो मंत्रे ऽधिकारार्थमेषा मुद्रा प्र-
कीर्तिता ॥ ब्रह्महत्यासहस्राणि त्रैलोक्यमपि घातयेत् ॥ नासौ लिप्यति पापेन यो निमुद्रा-
निबंधनादिति ॥ अथ चक्रामणितयोगोपयोगानि ॥ शिवयोगे ॥ मूलाधारे त्रि

॥ रम ॥ ॥ ११० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धावर्त्तं ब्रह्मचक्रं भगोपमं । तत्र कंदे ऽग्निनिभं ध्यायेदधःशक्तिमभीष्टदां । स्वाधिष्ठानं न
तच्चक्रं नवचतुर्दलाबुजं । तदेवोड्डियानं ध्यायेत् पश्चिमाभिमुखं शिवं । पंचावर्त्तं नाभि
चक्रं सर्पाकारं तडित्सन्निभां । तत्र कुंडलिनीं ध्यात्वादधःशक्तिं सुसिद्धिदां । अथो ऽमृतवासृप
त्राब्जयुक्तं हृच्चक्रमिष्टदं । तन्मध्ये कर्णिकां ध्यायेज्ज्योतिर्लिंगाकृतिं त्विषां । पंचमं कं
ठचक्रं च तत्राश्रुत्वच्चतुर्थके इडापिंगलयोर्ध्यायेत् सुषुम्नां मध्यसंस्थितां । षष्ठं च घंटि
कालिंगं मूलं तद्राजदंतकं । ध्यायेत्तु दशमद्वारं तत्र शून्यं सुसिद्धये । भ्रूचक्रं सप्तमं त्वेकं
नालकं नालकंदं स्वाकप्रदं । ध्यायेद्दिव्यशिखाकारं तन्मध्ये ज्ञानलोचनं । ब्रह्मरंध्रे ऽष्टमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मरंध्रेऽष्टमं चक्रं निर्वाणाख्यं सुसूक्ष्मदं । तच्च जालंधरं ध्यायेत्सूक्ष्मं मोक्षप्रदं ततः । आ
काशबीजं नवमं प्रशस्तं त्रिकूटकं मूर्ध्नि गिरेश्चत्वरस्थे । ततोर्ध्वशक्तिं शुभदां सुरूपां
ध्यायेच्च साष्टार सरोजमध्ये इति । । शास्त्रांतरे । प्रथमं ब्रह्मचक्रं स्यात्त्रिरावृत्तं भगाकृ
तिं । अपाने मूलकंदाख्यं कामरूपं च तज्जगुः । तदेव वह्निकुंडं स्यात्तत्र कुंडलिनी स्थिता
तां बीजरूपिणीं ध्यायेज्ज्योतिष्कां शक्तिरूपिणीं । स्वाधिष्ठाने द्वितीयं स्यात्स्वचक्रं तन्मध्यगं
विदुः । पश्चिमाभिमुखं लिंगं प्रवालांकुरसन्निभं । तत्रोड्डियानपीठं तु ध्यात्वाकर्षयेज्ज
गत् । तृतीयं नाभिचक्रं स्यात्तन्मध्ये भुजगी स्थिता । पंचावर्ता मध्यशक्तिश्चिद्रूपा विद्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राकृतिः ।। तां ध्यात्वा सर्वसिद्धीनां भाजनं जायते ध्रुवं ।। चतुर्थं हृदये चक्रं विज्ञेयं तदधो
मुखं ।। ज्योतिरूपं च तन्मध्ये हंसं ध्यायेत् प्रयत्नतः ।। संध्यायतो जगत्सर्वं तद्वश्यं स्यान्नात्र
संशयः ।। पंचमं कंठचक्रं स्यात्तत्र वामे इडा भवेत् ।। दक्षिणे पिंगला ज्ञेया सुषुम्ना मध्य
तः स्थिता ।। तत्र ध्यात्वा शुचि ज्योतिः सिद्धीनां भाजनं भवेत् ।। षष्ठं च तालुका चक्रं घंटिका
स्थानमुच्यते ।। दशमद्वारमार्गं तद्राजदंतो च तज्जगुः ।। तत्र शून्ये लयं कृत्वा मुक्तो भवति
निश्चितं ।। भ्रूचक्रं सप्तमं विद्याद्बिंदुस्थानं च तद्विदुः ।। भ्रुवोर्मध्ये वर्तुलं च ध्यात्वा ज्योतिः
प्रमुच्यते ।। अष्टमं ब्रह्मरंध्रं स्यात्परं निर्वाणसूचकं ।। तं ध्यात्वा सूचिकाग्राभं धूमाकारं वि

॥यो॰ विं॰॥ उच्यते॥ तच्चनाडेपरंज्ञेयंमोक्षदंलीनचेतसां॥ नवमंव्योमचक्रंस्याद्द्वलैःषोडशभिर्युतं
॥११२॥ संविद्रूपाचतन्मध्येशक्तिःसूक्ष्मास्थितापरा॥ तत्रपूर्णागिरौपीठेशक्तिंध्यात्वाविमुच्यते॥ ऊ
र्ध्वशक्तिनिपातेनअधःशक्तेर्निकुंचनात्॥ मध्यशक्तिप्रबोधेनजायतेपरमंसुखमि
ति॥ एतन्मूलंत्रिपुरासारसमुच्चयेविस्तरेणोक्तंतथाहि॥ अथाधारपंकेरुहाण्यपत्र
वक्ष्येऽष्टमार्गान्तरस्थानिसंक्षेपतोऽहं॥ तदंभोजपत्रेस्थिताश्चापिदेवास्तदंभोजवर्णाभव
र्णाश्चतुर्भिःसमेतंदलैर्योगिगम्यंमहाश्चर्यभूतं॥ चतुर्ष्वत्रपत्रेषुदेवीनिबद्धाजलार्णा गु॰
दिवर्णान्तसंस्थैकवत्तान्वासविंदुनविंदुस्वभावान्स्मृताःस्फुरज्ज्योतिषोडाकिनीदेवता ११२

115

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र ॥ मूलाधारे समनं तं व्यायोगात्स्तंभस्त्वो भात्तत्र क्रान्तिर्दर्दुरीव ॥ भूमित्यागः खेचरत्वं क
मेराणां रामेते मकुराः संभवंति ॥ कांतिप्रकर्षो वपुषोपि नादव्यक्तिः प्रदीप्तिर्जठरा
नलस्य ॥ लघुत्वमंगस्य निर्जिताक्षियाणां पटुत्वमारोग्यमदीनता च ॥ कृत्वा मनो निश्चल
मत्र मूलचक्रे नराः संततमादरेण ॥ भूतं भवच्चापि भविष्यदर्थं वदंति शास्त्राण्यपि चा
श्रुतानि ॥ विहायसश्चः कमनामनस्य वक्त्रांबुजं प्रीणितरंगसंगात् ॥ नदीयवक्त्रांबु
रुहोदरान्ते सरस्वती नृत्यति दिव्यरूपिणी ॥ अधिगम्य रसेंद्रमन्त्रसिद्धीनपि कालं च
विजित्य दुर्निवारं ॥ अजरामरतामवाप्य चान्ते परमानंदपदे सुदारमंते रकी भूतरणं वांभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽऽतमखिलं जगन्नूवमासीदपूर्वं ज्योतिर्मूर्त्तिस्तदंतर्महितमहिमभूर्ल्लिंगरूपीबभूव ।। यरं
सिद्धाधिष्ठितान्मासकलसुरगुनः पद्मरास्येरुपेतः वउभिः कोट्योथदेवोस्वभयतिमिरध्वं
सहंसोमेहेशाः ।। श्रृंगंलिंगवपुर्भ्रतोदेवोद्विरंगेभवदतोपूर्वमुखंशिवस्मतुमहाकालस्व
योर्द्ध्वाननं ।। वक्त्रंदक्षिणाम्नाशुभ्रस्फटिकमौदेवः पिनाकीपुनः ।। पाश्चात्यंकनकंतरूपभगः
वान्वामास्यतस्याभवत ।। स्वाधिष्ठानसमाह्वयंरसदलैर्भूलैर्मूले ध्वजस्यांबुजंवान्वादित्यनि
भंदलोयरिगतैः रुक्मादितर्काक्षरैः ।। विद्युत्कांतिनमस्तकेभगवतोलिंगात्मनः भूलिनः स्य
नंयोगिवरेरागोवरमिदंवास्याधिपाराकिनी ।। इहस्वाधिष्ठानेनिहितनिजचेतालयवशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रमदानदोषात्स्तिमितहृदयः साधकवरः समेतांगो नंगः क्षितितलगतानां मृगदृशां स्मरस्मेरापांगै
रमयति गणांकांतिकलितः ॥ ५ ॥ इह वेत्ति निध्यायमानः संस्वं विविधं वा श्रुतशास्त्रजालमनुद्वेषः ॥ ६ ॥ अवधृ
तजरामयः समर्थः सुचिरं जीवति वीतमृत्युभीतिः वपुषोः शुचिभाजनस्य शश्वत्स्मरमोन्मशुद्धिमि
हातनोति पुंसां शरदिंदुदीप्तिलवस्य देहे दृढसक्तोघनतां वशीनरश्मिः ॥ ७ ॥ वलितसहसा महारसेंद्रक
मलालोकनतो वियत्स्तरो जातः ॥ उद्धयेविविनिवारयंति सन्तोननुधीरा पुरुषोत्तमा मनास्ते ॥ ८ ॥ मदधौत
कटोमहाजेंद्रो वशतामेति यथा शनैरुपायात् ॥ ९ ॥ वलावानिह वैसुधाकरोसौ क्रमरुद्धः स्ववशोस्थ
स्य वशं ॥ १० ॥ एतस्मिन्कुलिशाज्ज्वयोगनिरता शदैलयो जायते वा गादीन्द्रियदंतिनां लयवशात्तं -

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ या॰वि ॥ विन्निर पूर्जितान्तर्ह्रीं महारसद्रवजुष्टां रागां वचेनोलपादाविर्भा चद्रपैत्यसंदसहजानंद स्व
॥ ५८ ॥ लिंदूदय ॥ नाभिस्थं मणिपूरकं दशदले नीलाजनाभैर्युतं तत्राग्ने स्व ॥ दशाक्षरैर्दलगतैर्विन्दूल्ल
स्पाल के: ॥ ताकिमासमधिष्ठितं चसततं ध्यानान्नराः केवलं वह्ण्याकर्षणानिर्विषीकरणपू
क्षोभादिकं कुर्वते ॥ स्थानेस्मिन्निहितात्मनः सुहृतिनः पानानलसिद्धिः परासद्य ॥ स्याप्रतिमस्यसा
धनमपिस्यादीप्सितं च क्षितौ रूपं भूमिविवर्जनं परपुरे शक्तिः प्रवेशंतु जराहानि श्चाखिलदुःख
रोगशमनं कालस्य वावंचनं हृदयसारसेद्रुगोपसं ध्यायन सिंदूरसुवर्णाभज्वं ॥ तदनाहतमि ॥ गुरु ॥
त्युक्तानिसंतोरविविसंस्थे रूपशोभितं दले श्व ॥ कोधीशाद्यैर्भैरवैर्भानुसंख्यैर्दंठोपेतैर्मण्डितं चंडवी- ॥ ११८ ॥

३५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जेयैः ॥ तत्काकिन्याधिष्ठितं दिव्यज्ञानत्वाद्देव्याहंसेनापि देवेन शश्वत् ॥ एतस्मिन्सततं निवि
ष्टमनसः स्थाने विमाने स्थिताः स्रुभ्यं स्फुरद्रूपकांतिकलिता दिव्यस्त्रियो योगिनः ॥ ज्ञानं चा
प्रतिमं त्रिकालविषयं क्षोभप्रसरस्य श्रुतिर्दूरादेव च दर्शनं च स्वमतिः ॥ स्याद्योगिनीमेलनं ॥ विशु
द्धाख्ये कंठकमलमथ धूम्राभिर्विभिन्नं तत् श्रीकंठादिस्वरपरिगतैः षोडशदलैः ॥ इह स्थाने
शाकिन्यतुलनिजशक्तिर्भगवती स्थिता नित्यं देवी शरणागतभवाग्निप्रशमनी ॥ अभ्यासयोगा
दिह संनिविष्टं स्वान्तस्य शश्वन्नरपुंगवस्य ॥ समर्थता स्यादनधीतशास्त्रे सर्वार्थतमः स्याद्
उद्घातनेऽस्मिन् ॥ स्थाने च संस्कृतमनामनुष्यस्त्रिकालदर्शी विगताधिरोगजित्वा जरां स ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यो·वि
११५

ननीलकेशः क्षितौ चिरंजीवति वीतमन्युः॥ इहस्थानेचित्तंसततमवधायाब्जपवनोयदिक्रु
द्धेयोगीकलयतिसमस्तंत्रिभुवनं॥ नचब्रह्माविष्णुर्नचहरिहयोनैवस्कमणिगास्तदीयंसाम
र्थ्यंशमयितुमलंनापिगरापः॥ आज्ञानामभ्रूयुग्ममध्येदलयुगमोपेतंशारदचंद्रमयूखाभं॥
ह्याकिन्युक्ताज्ञापिचरेवादलयुगमेवर्णौवंत्यौविंदुयुतौसंस्मरणीयौ॥ ध्यानयोगनिरतस्यजा
यतेपूर्वजन्मकृतकर्मणांस्मृतिः॥ अत्रविंदुनिलयेचतूरंतोदर्शनश्रवयोःसमर्थ्यते॥ इहसंनि
हितस्वचित्तवृत्तिःप्रतिमायाःप्रतिजल्पनंकरोति॥ गमनंचनरःपुरेपरेषांपुनरुत्थापनमप्यथो
मतस्य॥ निरालंबामुद्रांनिजगुरुमुखैनैवविदितामिहस्थानेवध्यास्थिरनिहितधीःसाधककव

गुरु
११५

र॥ सदाभ्यासात्मज्ञपन्नरमनिलयानन्तर रविलासकुं श्रेणी विहारपि पद्मसुहृन्नामधिपतिं ॥ ब्र
ह्मोरांसुरसंदवादितपदद्वंद्वमुकुंदं तथाशंभुं देवनिकायनायकमपि प्रेतनाथिपं वारिपं ॥ अग्न्याव
द्रिमपि प्रभुं श्वपवनं ताश्वचयक्षीस्वरं गंधर्वानपि किन्नरानपि गणोः सिद्धान्सुसिद्धानपि ॥ य
क्षान्नाग्समपुंगवानपि मुनीन्दिव्यांश्चभव्यानपि जीनन्त्रः कान्निकल्लोकल्लापकल्लितान् विद्या
धरान्मातरं ॥ रंगोत्तुंगतरंगसंगतजलां स्वर्लोककल्लोलिनीं योगीपश्पतिदुग्धसागरस
विंतं चापि हि मांचलं ॥ उत्तुंगपीवरपयोधरनम्रकंम्रदिव्यांगमंगजमतंगजमंदयानं ॥ उद्दामि
वह्नियुगलं च कैतैराशावलोलेक्षणां विमरम्भपरसांतथैव ॥ समुत्तुंगैः शृंगैः स्थगितगगा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥यो॰वि॥
॥११९॥

नाभोगललिताःश्च स्नानारत्नाकलितकटकान्भूधरवरान् ॥ कुरंगैः सारंगैरपि च रमणीयां
वनभुवं तथा गुर्वीसुर्वामपि च विविधवृक्षैश्च सच्छिन्नां ॥ नरंगैरुत्तुंगैरपि मकरमातंगनिकरैः क
रालानाभीरैरपि जलधरैर्भूधरवरैः ॥ तथापारं वारान्निधिमपरसरितो वारिभरिता स्सहंसालीपा-
लीमप्यब्जसरसां सारसजुषां ॥ एतस्मिन्परमाद्भुताव्ययमहानन्दैककंदे परे स्वान्ते संगमतां मनः
स्थिरमतिः संयोजयेन्मुद्रया योगी तन्मयतामुपैति न शनकैः श्वेते निरालंबया पश्यां नैजमहासु
खलयवशाद्दिविर्भवत्यांतरं ॥ लीने चेतसि तत्र विश्वनिलयवद्धारिवाचौ करागारुआपन्नेत्तदनन्त
रं च विलसद्रूपाइद्दी पांकुराः ॥ वालस्येव दिवाकरस्य वद्दलोग्यो ततेयद्या भूगगनान्तरालविर

॥गुरु॥
॥११९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सज्योत्स्नासपत्नं स्मर ॥ नित्यानंद इति प्रियः पतिरिति श्रीवासुदेवः पुमानात्मेत्युच्यत इत्यचिंत्य
महिमा योगीयते योगिभिः ॥ स्थानेस्मिन्परमे स एव भगवान्व्यक्तो भवत्यव्ययः साक्षी रागउरिवान्न
रान्तरगतश्चांद्रार्कयोर्मंडले ॥ विश्वस्यायतनं स्मर ध्रुव भगवतः स्थानं तदेतत्पदं यद्वारोग्यसमीरणोसु
ष्ठतिनः प्राणाप्रयाणे नराः ॥ दिव्यं तत्परमं पुराणपुरुषं वेदांतवेद्यं कविं विश्वाद्यं प्रविशंतिसं
ततमहानंदैकदंपभुं ॥ सहस्रारपद्मं विसर्गादधस्ताद्धो वज्रमार्गान्तर्किंजल्कपुंजं ॥ कुरंगेरा
हीनस्त्रिधांगस्थदंतःस्फुरद्रश्मिजालैः सुधांशुः समास्ते ॥ तदंतर्गतं ब्रह्मरंध्रं सुसूक्ष्मं यदाधार
भूतं सुषुम्नाग्रवाच्यं नाड्याः ॥ तदेतत्पदं दिव्यमत्यंतगुह्यं सुरैरप्यगम्यं सुगोप्यं प्रयत्नात ॥ एतत्के

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लासंज्ञं परमकुलपदं विंदुरूपी स्वरूपीयश्चास्ते देवदेवो भवभयतिमिरध्वंसहंसो महस्रः ।।
भूतानामाद्विभूतो रसविसरसितां संततामंतरंगैः सो धीधारां विमुंचन्नभिमतफलदो योगि-
नां योगगम्यः ।। स्थानं स्यास्यज्ञानमोहेरणान्नृणां संसारेस्मिन्संभवो नैव भूयः ।। भूतग्रामं संतता-
भ्यासयोगात्तं नूनं हंतुं स्याच्छक्तिः समग्रा ।। स्थाने परे हंसनिवासभूते कैलासनाम्नीह निधाय
चेतः ।। योगागतव्याधिरधः [illegible] नाडिवाध[illegible]रंजो वनि [illegible] ।। स्थानेस्मिन्क्षयवृद्धिभा-
वरहितानित्योदिता [illegible] दित्या [illegible] प्रभाशशमृतः सास्ति कला [illegible] ।। बालाग्रस्य-
विरखडितस्य [illegible] भागेन चैकेन यासूक्ष्मत्वात्स दृशी निरंतरगलत्पीयूषधाराधरा ।। ए:

१२०

तस्याः परतः स्थिता भगवती भूताधिदैवाधिपा निर्वाणाख्यकलार्द्धचंद्रकुटिला सा योऽस्यां
न्तर्गा । वालाग्रस्य सहस्रधा विदलितस्यैकेन भागेन या सूक्ष्मत्वात्सदृशी त्रिलोकजननी याद्वा
दशार्कप्रभा । निर्वाणाख्यकलायदेपरिगता निर्वाणशक्तिः परा कोट्यादित्यसमप्रभा तिग्म
ह्ना वालाग्रभागस्यया । कोट्यंशेन समा समस्तजननी नित्योदिता निर्मला नित्यानंदप्रद
लेकु निगलत्प्राणा निरालंबना । ४ तस्याः परतः परात्परतरं निर्वाणशक्तेः पदं शैवं शाश्वतम
प्रमेयममलं नित्योदितं निःक्रियम् । तद्विष्णोः पदमित्युशंति सुधियः केचित्पदं ब्रह्मणः
: केचिद्धंसपदं निरंजनपदं केचिन्निरालंबनं आरोप्यारोप्यशक्तिकमलजनिलयात्मना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो·वि॥
॥११८॥

साकंमेवस्थाने ष्वाज्ञावसानेष्ववहितहृदयश्चिंचयित्वा कंमेरा॥ नौन्त्रा नादावसानं:
रवगामक्लमहाम प्रपयां नरस्या ध्यायेद्वैन स्वरूपां समभिवर्षितफलप्रादपि शक्ति मापा:
म॥ साक्षा ह्या श्वार सार्भगगानगतमहा पद्म:॥ सद्य स्यहंसा स्पीत्वादि व्यामतं तो घंघुनरपिचवि
शिन्म ध्याद्देशकुलम॥ वंके चंके कंमेरामनुरक्ष विसरैस्तर्पयेद्देवतास्ता हाकिन्या श्या: कमल
जदलगान्तर्पयेत्कुंडलीनांकु थषट्कर्माणि॥ हठप्रदीपिकायां॥ धौती बस्ती तथा नेती त्राटकं:
नौलिकं तथा॥ कपालभाती चैतानि षट्कर्माणि प्रचक्षते॥ कर्मषट्कमिदं गोप्यं घटशो ध
नकारकं॥ विचित्रगुणसंधायि पूज्यते योगिपुंगवै॥ अथ धौती॥ चतुरंगुलविस्तारं ह

॥ गुरु॥
॥११८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तपंचदशायतम्‌ ॥ गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत्‌ ॥ पुनः प्रत्याहरेच्चैतदभ्यासाद्धौत
कर्मवित्‌ ॥ कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः ॥ धौतीकर्मप्रभावेन प्रयान्त्येव न संश
यः ॥ अथ वस्ती ॥ नाभिदघ्नजले पायुन्यस्तनालोत्कटासनः ॥ आधाराकुंचनं कुर्यादभ्याः
साद्वस्तिकर्मवित्‌ ॥ गुल्मोदरं चापि वातप्लीह पित्तकफोद्भवान्‌ ॥ वस्तिकर्मप्रभावेन वाध्यंते स
कलामयाः ॥ धात्विंद्रियांतःकरणप्रसादं दद्याच्च कांतिं दहनप्रदीप्तिं ॥ अशेषदोषोप
चयं निहन्यादभ्यस्यमानं जलवस्तिकर्म ॥ अथ नेती ॥ सूत्रं वितस्तिसुस्निग्धं नासानाले प्र
वेशयेत्‌ ॥ मुखान्निर्गमयेत्साहि नेती सिद्धैर्निगद्यते ॥ कपालशोधनी चैव दिव्यदृष्टिप्रदायि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नी। जत्रूर्द्ध्वजातरोगाघ्राजरयत्याशुनेतिर्वित। अथत्राटकं। निरीक्षेन्निश्चलदृशासूक्ष्मंस
माहितः। अश्रुपातनपर्यन्नमार्यैस्तत्राटकंमतं। मोचनंनेत्ररोगाणांतंद्रादीनांकपाटकं। य
त्नतस्त्राटकंगोप्यंयथाहाटकपेटकं॥ ॥अथनौली॥ ॥अमंदावर्तवेगेनतुन्दंसव्यापसव्यतः
योः। नतांसोभ्रामयेदेषानौलीयोगैप्रचक्षते। मंदाग्निसंदीपनपाचनाग्निसंधापिकानंद
करीतथैव। अशेषदोषामयशोषणीचहठक्रियामौलिरियंहिनौली। ॥अथकपाल
भाती। भस्त्रेवलोहकारस्यरेचपूरौससंभ्रमौ। कपालभातीविख्याताकफदोषविशो
षिणी॥ ॥अथमुद्रा॥ ॥पवनयोगसंग्रहे॥ महामुद्रामहाबंधोमहावेधश्चखेचरीश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तिचालो मूलबंधश्चोड्डियानं ततः परं ।। जालंधराभिधो बंधो विपरीतकरणीस्तथा इति ।। ।।
हठप्रदीपिकायां ।। सशैलवनधात्रीणां यथाधारोऽहिनायकः ।। सर्वेषां योगतंत्राणां त-
था धारो हि कुंडली ।। सुप्ता गुरुप्रसादेन बोधिता सुखदा भवेत् ।। तदा सर्वाणि पद्मानि
भिद्यंते ग्रंथयोऽपि च ।। प्राणस्य शून्यपदवी तथा राजपथायते ।। तथा चित्तं निरालंबं तथा
कालस्य वंचनं ।। तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीं ।। ब्रह्मद्वारमुखे सुप्तां मुद्राभ्या-
सपरो भवेत् महामुद्रा महाबंधो महावेधश्च खेचरी ।। उड्डियानं मूलबंधो बंधो जालंधरा-
भिधः ।। करणी विपरीताख्या वज्रोली शक्तिचालनं ।। एतद्धि मुद्रानवकं जरामरणवर्जि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं ॥ आदिनाथोदितं दिव्यमष्टैश्वर्यप्रदायकं ॥ दुर्लभं सर्वसिद्धानां दुर्लभं मरुतामपि ॥ गो
पनीयं प्रयत्नेन यथा रत्नकरंडकं ॥ कस्यचिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा ॥ अथ महा
मुद्रा ॥ स्कंदपुराणोक्ता भवनेनाडिजालस्य घटनं चंडसूर्ययो ॥ रसानां शोषणं सम्यक्म
हामुद्राभिधीयते ॥ ईश्वरप्रोक्ते ॥ महामुद्रां प्रवक्ष्यामि तंत्रेस्मिन्मम वल्लभे ॥ यां प्राप्य
सिद्धकाः सिद्धिं कपिलाद्याः पुरोगता ॥ अपसव्येन संपीड्य पादमूलेन सादरं ॥ गुरूपदेशतो
योनिं गुदमेढ्रांतरालगां ॥ सव्यं प्रसारितं पादं धृत्वा पाणियुगेन तु ॥ नवद्वाराणि संय
म्य चिबुकं हृदयोपरि ॥ चित्तं चतुःपथे दत्वा प्राणमेवाधु धारयां ॥ महामुद्रा भवत्येषा स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वंतंचैसुगोपिता॥ वामांगेनसमभ्यस्य दक्षांगेनाभ्यसेत्पुनः॥ प्राणायामंसमंकृत्वायोगी
नियतमानसः॥ मुद्रामिमांतुसंप्राप्य गुरुवक्त्रात्सुगोपितं॥ अनेनविधिनायोगीसंय
भाग्योपिसिध्यति॥ सर्वासामेवनाडीनां चालनंबिंदुधारणां॥ जारणांतुकषायस्यपातक
कानांविनाशनं॥ कुंडलीतापनंवायोर्ब्रह्मरंध्रप्रवेशनं॥ सर्वरोगोपशमनंजठराग्निविव
र्धनं॥ वपुषःकांतिममलां जरामृत्युविनाशनं॥ वांछितार्थबलंसौख्यमिंद्रियाणांच
मारणं॥ एतान्युक्तानिसर्वाणिमार्गारूढस्ययोगिनः॥ भवेदभ्यासतोवश्यंनात्रकार्या
विचारणा॥ गोपनीप्रयत्नेनमुद्रेयंसुरपूजिता॥ यांतुप्राप्यभवाम्भोधेः पारंगच्छंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥यो॰चि॥
॥१२१॥

योगिनः॥ मुद्राकामदुघाख्येषा साधकानां मयोदिता॥ गुप्ता चारेण कर्त्तव्या न देया यस्य कस्य
चित्॥ इयं खलु महामुद्रा महासिद्धैः प्रशस्यते महाक्लेशायते दोषा जीर्यन्ते मरणादय
ः॥ महामुद्रां च तेनैव वदंति विबुधोत्तमाः इति॥ हठप्रदीपिकायां॥ यथा दंडाहतः सर्पो दं
डाकारः प्रजायते ऋज्वीभूता तथा शक्तिः कुंडली सहजा भवेत्॥ पादमूलेन वामेन योनिं
संपीड्य दक्षिणां॥ पादं प्रसारितं धृत्वा कराभ्यां पूरयेन्मुखं॥ कंठे बंधं समारोप्य धारयेद्वा
युमूर्द्धतः॥ तथा सो मरणावस्था हरते विप्रदा श्रुयं॥ न हि पथ्यमपथ्यं वा रसाः सर्वेपि
नीरसाः॥ अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति॥ क्षयकुष्ठगुदावर्तगुल्मप्लीहप

॥गुरु॥
॥१२१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोगस्मा ॥ नस्यदोषाः क्षयं यांति महामुद्रां चयोभ्यसेत् ॥ ॥ अथ महाबंधः ॥ ईश्वरप्रोक्ते ॥
योन्याः प्रसारितः पादो विन्यस्यतमुरूपरि ॥ गुदयोनिं समाकुंच्य नीत्वा चापानमूर्द्धगं ॥
योजयित्वा समानेन कृत्वा प्राणामधोमुखं ॥ बंधयेदूर्द्धगत्यर्थं प्राणापानौ यः सुधीः ॥
कथितोयं महाबंधः सिद्धिमार्गप्रदायकः ॥ नाडीगलद्रसव्यूहं मूर्द्धनयति योगिनः उभाभ्यां
साधयेत्पद्भ्यां एकैकं सुप्रयत्नस्थितः ॥ भवतमत्र तु केषांचित्कंठबंधं विवर्जयेत्
राजदंतद्वयं तत्र जिह्वया बंधयेदिति ॥ भवेदभ्यासतो वायुः सुषुम्णामध्यसंगतः ॥ अने
नवपुषः कांतिर्दृढं बंधोस्थिपंजरः ॥ संपूर्णहृदयो योगी भवंत्येतानि योगिनः ॥ बंधेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेनयोगीद्रःसाधयेत्सर्वमीप्सितं ॥ अपानप्राणयोरैक्यंकृत्वात्रिभुवनेध्रुवे ॥ हठप्रदीपि
कायां ॥ पार्ष्णिंवामस्यपादस्ययोनिस्थानेनियोजयेत् ॥ वामोरुपरिसंस्थाप्यदक्षिणं
चरणंतथा ॥ पूरयित्वामुखेवायुंहृदयेचिबुकंतथा ॥ निःपीड्ययोनिमाकुंच्यमनोमध्ये
नियोजयेत् ॥ रेचयेच्छनैरेवमहाबंधोयमुच्यते ॥ अयंखलुमहासिद्धिप्रदायकः ॥ का
लपाशमहाबंधविमोचनविचक्षणः ॥ अयंतुसर्वनाडीनामूर्द्ध्वगमनरोधकः ॥ त्रिवे
णीसंगमधत्तेकेदारंप्रापयेन्मनः ॥ ॥ अथमहावेधः ॥ रूपलावण्यसंपन्नायथास्त्रीपुरु
षंविना ॥ महामुद्रामहाबंधौनिःफलौवेधवर्जितौ ॥ महावेधस्थितोयोगीकृत्वापूरक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिकधीः॥ वायूनांगतिमावृत्यनिभृतंकंठमुद्रया॥ समहस्तयुगोभूमौस्फिचौसंता
डयेच्छनैः॥ पुटद्वयंसमाक्रम्यवायुःस्फुरतिमध्यगः॥ सोमसूर्याग्निसंधानंजायतेचा
मृतायते॥ मृतावस्थासमुत्पन्नाततोमृत्युभयंकुतः॥ महावेधोयमभ्यासान्महासिद्धिप्रदा
यकः॥ वलीपलितवेपघ्नःसेव्यतेसाधकोत्तमैः॥ एतत्त्रयंमहागुह्यंजरामृत्युविनाशनं
॥ वह्निवृद्धिकरंचैवह्यणिमादिगुणप्रदं॥ अष्टधाक्रियतेचैवयामेयामेदिनेदिने
पुण्यसंभारसंधायिपापौघभिदुरंसदा॥ सम्यक्शिक्षावतामेवस्वल्पंप्रथमसा
धनैः॥ ईश्वरप्रोक्तं॥ महावेधस्थितोयोगीकुक्षिमापूर्यवायुना॥ स्फिचौसंताडये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छिद्रान्वेषोयं कीर्त्तितो मया ॥ वेधेनानेन संविद्धवायुना योगिपुंगवः ॥ ग्रंथीन्सुषुम्णा
मार्गेणाक्रम्यारं ध्रं भिनत्यसौ ॥ यः करोति सदाभ्यासमहावेधं सुगोपितं ॥ वायुसिद्धिर्भवे
त्तस्य जरामृत्युविनाशनं ॥ चक्रमध्ये स्थिता देवाः कंपंते वायुताडनात् ॥ कुंडल्यपि महा
माया कैलासे संविलीयते ॥ तस्माद्योगी प्रयत्नेन करोति त्रितयं क्रमात् ॥ एतत्त्रयं प्रयत्नेन
चतुर्वारं करोति यः ॥ षण्मासाभ्यंतरे मृत्युं जयत्येव न संशयः ॥ एतत्त्रयस्य माहात्म्यं सि
द्धो जानाति नेतरः ॥ यज्ज्ञात्वा सिद्धयः सर्वे सिद्धाः स्युः किंचिन्मेधिरे चिरं ॥ गोपनीयं प्रयत्ने
न साधनं सिद्धिमिच्छता ॥ अन्यथा च न सिद्धिः स्यान्मुद्राणामेष निर्णयः ॥ अथ खेचरी

॥गुरु॥
॥१२२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगबीजे ॥ वितस्तिप्रमितं दीर्घं विस्तारं चतुरंगुलं ॥ मृदुलं धवलं प्रोक्तं वेष्टनांबरलक्षणमि-
ति ॥ हठप्रदीपिकायां ॥ छेदनचालनदोहैः जिह्वां संवर्द्धयेत्तावत् ॥ यावदियं भ्रूमध्यं स्पृशति
तदा खेचरीसिद्धिः ॥ कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् ॥ सा भवेत्खेचरी मुद्रा व्योम-
चक्रं तदुच्यते ॥ रसनामूर्द्ध्वगां कृत्वा क्षणार्द्धमपि तिष्ठति ॥ विषैर्विमुच्यते योगी व्याधिमृत्यु-
जरादिभिः ॥ खेचर्या मुद्रितं येन विवरं लंबिकोर्द्ध्वतः ॥ न तस्य क्षरते बिंदुः कामिन्यालिंगितस्य
च ॥ चलितोपि यदा बिंदुः संप्राप्तश्च हुताशनं ॥ व्रजत्यूर्द्ध्वं हृतः शक्त्या निरुद्धो योनिमुद्रया
॥ स पुनर्द्विविधो बिंदुः पांडुरो लोहितस्तथा ॥ पांडुरं शुक्रमाख्यातं लोहिताख्यं महारजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ यो·चिं ॥
॥ १२८ ॥

सिंदूरसनिभं वीजं रविस्थाने स्थितं रजः ॥ शशिस्थाने स्थिते विंदुस्तयोरैक्यं सुदुर्लभं ॥
विंदुः शिवो रजः शक्तिर्विंदुरिंदु रजो रविः ॥ याति विंदोः सहैकत्वं भवेद्दिव्यवपुस्तदा ॥
शुक्लं चंद्रेण संयुक्तं रजः सूर्येण संयुतं ॥ तयोः समरसैकत्वं यो जानाति स योगवित ॥५
चित्रायतंत्रे रागां शुक्लं शुक्लायतंत्रं च जीविते ॥ तस्मानि न च शुक्लं चरभसीयं प्रयत्नतः ॥
पातालायवादियति शिरवरैर्मस्मूलनदस्ति नः स्वचे तत्सुवदति सुधीः संमुरेवं निम्नगा
॥ चउलस्यारं स्रवति वपुषस्तेन मृत्युर्नरा रागांतं व धीयात ॥ स्वकररामस्दानास्थाक
यसिद्धिः ॥ इंधनानि यथा वह्निस्तैलवर्त्तीव दीपकः ॥ नित्यं सोमकलापूर्णं देहं देहीन सं

॥ अ ॥
॥ १२८ ॥

वति॥रसनांवेशयेदूर्द्ध्वंपिवेत्सुधापितंजलं॥गोमांसभक्षयेन्नित्यंपिवेदमरवारुणीं॥कु-
लीनंतमहंमन्येनेतरान्कुलघातकान्॥गोशब्देनोदिताजिह्वातत्प्रवेशोहितालुनि॥गो-
मांसभक्षणंतत्तुमहापातकनाशनं॥जिह्वाप्रवेशसंभूतवह्निनोत्पादितःखलु॥चं-
द्रात्स्रवतियस्सारंसास्यादमरवारुणी॥एकंसृष्टिमयंवीजंएकामुद्राचखेचरी॥ए-
कोदेवोनिरालम्बएकावस्थामनोन्मनी॥नासनंसिद्धसदृशंनकुंभकेवलोपम॥न-
खेचरीसमामुद्राननादसदृशोलय॥मूर्द्ध्नःषोडशपत्रपद्मगलितंप्राणादवाप्तंहठा-
दूर्द्ध्वास्योरसनांनियम्यविवरेशक्तिंपरांचिंतयन्॥तत्कल्लोलकलाजलंचविमलंजि-

॥यो॰चिं॰॥
॥१२५॥

हाकुलंयः पिवेन्निर्दोषः समरगालकोमलवपुर्योगीचिरंजीवति ॥ चुंबंतीयदिलंविकाग्र
मनिशंजिह्वारसस्यन्दिनीसक्षारकटुकाम्लदुग्धसदृशंमध्वाज्यतुल्यंयदा ॥ व्याधी-
नांकहरणंजरांतकरणंशस्त्रागमोद्धारणंतस्यस्यादिहसिद्धिरष्टगुणितासिद्धांग-
नाकर्षणं ॥ स्कंदपुराणे ॥ कपालकुहरेजिह्वाप्रविष्टाविपरीतगा ॥ भ्रुवोरन्तर्गताद-
ष्टिर्मुद्राभवतिखेचरी ॥ चित्तंचरतिखेयस्माज्जिह्वाचरतिखेगता ॥ तेनैषाखेचरीना
ममुद्रासिद्धैर्निषेविता ॥ यावद्बद्धानभोमुद्रातावद्बिंदुर्नगच्छति ॥ यावद्बिंदुःस्थिरोदे
हेतावत्कालभयंकुतः ॥ पीड्यतेनसरोगेणनचलिप्यतकर्मणा ॥ वाध्यतेनसकालेन-

॥गुरु॥
॥१२५॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्येयोमुद्रां वेत्ति खेचरीं ॥ रसनां तालविवरे निधायोर्द्ध्वमुखे मते ॥ पिवेन्निर्जरतां गच्छेत्सरा
मासान्नात्र संशयः ॥ ऊर्द्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः ॥ मासार्द्धेन न संदेहो मृत्युं
जयति योगवित् ॥ संपीड्य रसनाग्रेण राजदंतबिलं महत् ॥ ध्यात्वामृतमयीं देवीं षण्मा
सेन कविर्भवेत् ॥ अमृतापूर्णदेहस्य योगिनो द्वित्रिवत्सरात् ॥ ऊर्द्ध्वं प्रवर्त्तते रेतो ह्यणिमा
मादिगुणोदयं ॥ नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः ॥ तक्षकेणापि दष्टस्य विषं
तेन न च सर्पति ॥ दत्तात्रेय ॥ अतः कपालविवरे जिह्वां व्यावृत्य चार्पयेत् भ्रूमध्ये दृष्टिरप्ये
षा मुद्रा भवति खेचरी ॥ न रोगो मरणं तस्य न च निद्रा क्षुधा तृषा ॥ न च मूर्छा भवेत्तस्य यो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रां वै निरवचरामिति ॥ ईश्वर प्रोक्त ॥ तं विकोर्ध्वं स्थितेमन्नौ रसनां विपरीतगां ॥ संयो-
जयेत्प्रयत्नेन सूधाकूपे विचक्षणा ॥ मुद्रैषा खेचरी प्रोक्ता भक्तानामनुरोधतः ॥ निरन्त-
र कृताभ्यासः पीयूषं प्रत्यहं पिबेत् ॥ तेन विग्रह सिद्धिः स्यान्मृत्युमातंगकेशरी ॥ मुद्रैषा-
खेचरीयस्य सुस्थिता स्यादतंद्रिता ॥ शातकुम्भगतेनापि क्षराद्यं मन्यते हि स इति ॥ अथ
मूलबंधः ॥ पादमूलेन संपीड्य गुदमार्गं सुयंत्रितं ॥ बलादपानमाकृष्य क्रमादूर्ध्वं सम-
भ्यसेत् ॥ कथितोयं मूलबंधो जरामरणनाशनः ॥ अपानप्राणयोरैक्यं क्षयान्मूत्रपुरी-
षयोः ॥ वंध्येनानेन सुतरां योनिमुद्रा प्रसिध्यति ॥ सिद्धायां योनिमुद्रायां किं न सिद्ध्यति भूत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ले॥ वंधस्यास्य प्रसादेन गगने विजितानिलः॥ पद्मासनस्थितो योगी भुवमुत्सृज्य वर्तते
॥ सुगुप्ते निर्जने देशे वंधमेनं समभ्यसेत्॥ संसारसागरं तर्तुं यदीच्छेद्योगिपुंगवः इति॥ ह
ठप्रदीपिकायां॥ पार्ष्णिघातेन संपीड्य योनिमाकुंचयेद्गुदं॥ अपानमूर्द्ध्वमाकृष्य मूलवंधो
यमुच्यते॥ अधोगतमपानं च ऊर्द्ध्वं कुरुते हठात्॥ आकुंचनेन तं प्राहुर्मूलवंधं तु यो
गिनः॥ योगवीजे॥ गुदं पार्ष्ण्या तु संपीड्य वायुमाकुंचयेद्बलात्॥ वारं वारं यथा चोर्द्ध्वं समा
याति समीरणः॥ प्राणापानौ नादविन्दू मूलवंधेन चैकतां॥ गत्वा योगस्य संसिद्धिं गच्छतो ना
त्र संशयः॥ अपाने चोर्द्ध्वगे जाते संप्राप्ते वह्निमंडले॥ तथानलशिखा दीर्घा वर्द्धते वायुनाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता॥ ततो वन्नौ वह्न्यपानौ प्राणमुक्तस्वरूपकौ॥ तेनात्यन्तःप्रसुप्तस्तु ज्वलनो देहजस्तः
था॥ तेन कुंडलिनी सुप्ता संतप्ता संप्रबुध्यते॥ दण्डाहतभुजंगीव निश्वितं ऋजुतां व्रजेत
॥ विलं प्रविष्टेव तथा ब्रह्मनाड्यंतरं व्रजेत्॥ तस्मान्नित्यं मूलबंधः कर्त्तव्यो योगिपुं
गवैः॥ अथ उड्डियानबंधः॥ योगबीजे॥ बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः॥
तस्मादुड्डियानोऽयं योगिभिः समुदाहृतः उड्डीनं कुरुते यस्मादविश्रान्तं महाखग
गः उड्डियानं तदेव स्यान्मूलबंधोऽभिधीयते उदरे पश्चिमं तानं नाभेरूर्द्ध्वं समाचरे
तड्डियानोह्यसौ बंधो मृत्युमातंगकेसरी॥ उड्डियानं तु सहजं गुरुणा कथितं यथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यसेत्सततं यस्तु वृद्धोपि तरुणायते ॥ नाभेरूर्द्ध्वमधोवापि तानं कुर्यात्प्रयत्नतः ॥ षण्
मासमभ्यसेन्मृत्युं जयत्येव न संशयः ॥ हठप्रदीपिकायां ॥ सति वज्रासने पादौ कराभ्यां
धारयेद्दृढं ॥ गुल्फदेशसमीपे च कंदं तत्र प्रपीडयेत् ॥ पश्चिमं तानमुदरं कारयेद्बुद्धिचिबु
कहृदि ॥ शनैः शनैर्यथा प्राणास्तुंदसंधिं न गच्छति ॥ सर्वेषामेव बंधानामुत्तमो ह्यु
ड्डियानकः ॥ उड्डियाने दृढे बंधे मुक्तिः स्वाभाविकी भवेत् इति ॥ ईश्वरप्रोक्तः ॥ नाभेरू
र्द्ध्वमधश्चापि तानं निर्भरमाचरेत् ॥ उड्डियानो बंध एष सर्वदुःखौघनाशनः ॥ नित्यं
यः कुरुते योगी चतुर्वारं दिने दिने ॥ तस्य नाभेर्विशुद्धिः स्यात् येन सिद्धो भवेन्मरुत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ षरामासमभ्यसेद्योगी मृत्युं जयति न क्वचित ॥ तस्यादराग्निर्ज्वलति रसवृद्धिश्च
जायते ॥ अनेन सुतरां सिद्धिर्विग्रहस्य प्रजायते ॥ रोगाणां संक्षयश्चापि योगिनो भ
वति ध्रुवं ॥ गुरोर्लब्ध्वा प्रयत्नेन साधयेत्तु विचक्षणः ॥ निर्जने तु स्थिते देशे वंधंप
रमदुर्लभमिति ॥ अथ जालंधरबंधः ॥ बध्वा गलशिरोजालं हृदये चिवुकं न्यसे
त् ॥ वंधो जालंधरः प्रोक्तो देवानामपि दुर्लभः ॥ नाभिस्थवह्निर्जंतूनां सहस्रकमः
लच्युतं पिवेत्पीयूषं रसवत्तदर्थं वंधयेदिदं ॥ वंधेनानेन पीयूषं स्वयं पिवति वुद्धिः
मान्यकः ॥ अभ्यासः क्रियते नित्यं योगिना सिद्धिमिच्छतेति ॥ योगवीजे ॥ कंठमाकुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्याहृदयेस्थापयेद्दृढमिष्ठया ॥ बंधो जालंधराख्योयममृताव्ययकारकमिति ॥ हठ:
प्रदीपिकायां ॥ बध्नाति हि शिरोजालमधोगामिनभोजलं ॥ ततो जालंधरो बंध: कंठदु
खौघनाशन: ॥ जालंधरे कृते बंधे कंठसंकोचलक्षणे ॥ न पीयूषं पतत्यग्नौ न च वायु: प
कुप्यति ॥ मध्यचक्रमिदं ज्ञेयं षोडशाधारबंधनं ॥ बन्धत्रयमिदं श्रेष्ठं महासिद्धनिषे:
वितं ॥ सर्वेषां हठतंत्राणां साधनं योगिनो विदुरिति ॥ अथ विपरीतकरणी ॥ हठयोगे:
॥ नाभिदेशे स्थितो नित्यं भास्करो दहनात्मक: ॥ अमृतात्मा स्थितो नित्यं तालुमध्ये च
चंद्रमा: ॥ वर्षत्य: धोमुख श्चंद्रो ग्रसत्यूर्द्ध्वमुखो रवि: ॥ करणं तच्च कर्तव्यं येन सा प्राप्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥यो॰चिं॰॥ ॥१२६॥

नेसुधा ॥ विशुद्धे परमे चक्रे रुध्वा सोमकलामृतं ॥ तन्मार्गेणाहृतं याति कवचयित्वाऽखरं रवेः ॥ अमृ
तं कंदरे कृत्वा नासांते शिखरे कस्मात् ॥ स्वयमुत्थापितं याति कंचयित्वाऽखरं रवेः ॥ वह्निं सोमक
लाजलं च विमलं कराठस्थलादूर्ध्वतो नासांतं शिखरे रसा याति गगनं धारन्नतः सर्वतः ॥ ऊर्द्ध
स्थोऽपि संनिपत्यानितरामुत्तानपादः पिवेदेवं यः ॥ कुरुते जितेंद्रियश्च यो नैवास्ति तस्य क्षयः
॥ हठप्रदीपिकायां ॥ यत्किंचित्स्रवते चन्द्राद् अमृतं दिव्यरूपिणः ॥ तत्सर्वं ग्रसते सूर्यस्तेन पिंडोऽन्व
नाश्रितं ॥ तत्रास्ति करणं दिव्यं सूर्यस्य मुखवंचनं ॥ गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥
ऊर्ध्वनाभिरधस्तालुरूर्ध्वं भानुरधः शशी ॥ करणी विपरीताख्या सर्वव्याधिविनाशिनी ॥ ॥द

॥गुरुः॥ ॥१२६॥

132

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाये ॥ ऊर्द्ध्वभोजधरश्चन्द्रस्तत्‌ यथाप्रशामसाकृते ॥ अधःशिरश्चोर्द्ध्वपादः क्षणां स्यात्प्रथमे दि-
ने ॥ क्षणाच्च किंचिदधिकमभ्यसेच्च दिने दिने ॥ वलितं पलितं चैव षण्मासार्द्ध्वं न दृश्यते
याममात्रं च यो नित्यं अभ्यसेत्स तु कालजित् ॥ नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनं
आहारो बहुलस्तस्य संपाद्यः साकृते घृते ॥ अल्पाहारो यदि भवेदग्निर्दाहं करोति वै ॥ अ-
थ शक्तिचालनं ॥ ईश्वरप्रोक्ते ॥ आधारकमले सुप्तां चालयेत्कुण्डलीं दृढं ॥ अपानवा-
युनाकृष्य वनाहकुं चयेद्विमात् ॥ शक्तिचालनमेवेह्निप्रापहं यः समभ्यसेत् ॥ अप-
ग्निवृद्धिर्भवेत्तस्य रोगाणां च विनाशनं ॥ विहाय विद्राअजगीस्वयमूर्द्ध्वं भवेत्खलु ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ यो· चिं· ॥
॥ १२० ॥

स्मादभ्यसनं कार्यं योगिना सिद्धिमिच्छता ॥ यः करोति सदाभ्यासं शक्तिचालनमु
त्तमं ॥ येन विग्रहसिद्धिः स्यादणिमादिगुणप्रदा ॥ गुरूपदेशविधिना तस्य मृत्युभ
यं कुतः ॥ मुहूर्तद्वयपर्यन्तं विधिना शक्तिचालनं ॥ वज्रासनगतो नित्यं मासार्द्धं तु स
मभ्यसेत ॥ वायुना ज्वलितो वह्निः कुंडलीं दहते निशं ॥ संतप्ता साग्निना नाडीचश॰
क्तिस्त्रैलोक्यमोहिनी ॥ विशते वज्रतुंडे न सुषुम्णावदनांतरे ॥ वायुना वह्निना सा
र्द्धं ब्रह्मग्रंथिं विभिद्य सा ॥ विष्णुग्रंथिं ततो भित्त्वा रुद्रग्रंथौ च तिष्ठति ॥ ततस्तु कुंभ
केनाढं पूरयित्वा पुनः पुनः ॥ भिद्यत्ते ग्रंथयावशीतप्लोहशाल्नाकया ॥ तथैव षट्

॥ गुरु ॥
॥ १२० ॥

वङ्गोस्याद्ग्रंथिभेदस्तु वायुना ॥ पिपीलिकायथालग्नाकंडूस्तत्रप्रवर्त्तते ॥ सुषुम्नायांत-
थाभ्यासात्सततंवायुनाभवेत् ॥ रुद्रग्रंथिंततोभित्वाततोयातिशिवात्मकमिति ॥ हठ
योगे ॥ उद्घाटयेत्कपाटंतुयथाकुंचिकयाहठात् ॥ कुंडलिन्यातथायोगीमोक्षद्वारंविभे
दयेत् ॥ येनद्वारेणगंतव्यंब्रह्मस्थानमनामयं ॥ मुखेनाछाद्यतद्द्वारंप्रसुप्तापरमेश्वरी
॥ कंदोर्ध्वेकुंडलीशक्तिःसुप्तामोक्षाययोगिनां ॥ बंधनायचमूढानांयस्तांवेदसवेदवि
त ॥ स्रग्मोविशेलक्षणानामाधारःशेषकुंडली ॥ सुशेषयोगतत्वाराणामाधारःकुंड-
लीतथा ॥ कुंडल्यांगाकुंडलिनीभुजंगीशक्तिरीश्वरी ॥ कुटिलांगारुंधतीदेवीशब्दाःप-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो॰चिं ॥ ॥ १३१ ॥

र्यायवाचकाः कुण्डली कुटिलाकारा सर्पवत् परिकीर्त्तिता ॥ सा शक्तिश्चालिता येन स मुक्तो
नात्र संशयः ॥ गंगायमुनयोर्मध्ये बालरण्डां तपस्विनीं ॥ बलात्कारेण गृह्णीयात् स याति परमां
गतिं ॥ पुच्छं प्रगृह्य भुजंगीं सुप्तामुद्बोधयेद्वधी ॥ निद्रां विहाय सा शक्तिरूर्ध्वमुत्तिष्ठते हठा
त् ॥ परिस्थिता चैव फणावती सा प्रातश्च सायं प्रहरार्द्धमात्रं ॥ प्रपूर्य सूर्यात्परिधानयुक्त्या प्रगृ
ह्य निर्याति विचालिता सा ॥ वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीं ॥ कुर्यादनन्तरं भस्त्रां
स्त्रा कुण्डलीमाशु बोधयेत् ॥ भानोराकुंचनं कुर्यात् कुण्डलीं चालयेत्ततः ॥ मृत्युवक्त्रगत ॥ गुरू ॥ ॥ १३१ ॥
पि तस्य मृत्युभयं कुतः ॥ नाभ्यादक्षिणामार्गेवा पवनो प्राणोऽति दीर्घीकृतं चन्द्राभः परिशी

134

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तामृतनन्तः प्राग्घघटिकायामतः ॥ भित्त्वा कालविशालवक्त्रविषगान्नूरंध्रनाडीगणात्
स्तकायं ॥ कुरुतेपुनर्नवतरं जीर्णाङुमस्कन्धवत् ॥ ऊराऽलीआतरियत्वातु कुर्याजस्त्वांघि
शोषतः ॥ एवमभ्यासयोगेन नित्यं यमिनः शाकटेयमः ॥ ततश्चसेत्तूर्ये भेदमुआपींच्या
पिशीतंलौ ॥ एवमभ्यासयुक्तस्य यमस्तु यमिनं कुतः ॥ उहूर्जं हृय पर्यंतन्निर्भस्त्वात
नाङ्घिवे ॥ ब्रह्मचर्यरतस्यैव नित्यं हितमिताशिनः ॥ मराऽलाद्दृश्यते सिद्धिः कुराऽत्य
भ्यासयोगिनः ॥ किंमन्त्रतिम हस्ताणां नाडीनां मलशोधनं ॥ कुन्तप्रक्षालनोपायः कुराऽ
त्यभ्यास[illegible]गिनः ॥ अवकाशंकिं चालनेपद्मासनमेवश्च स्वं नवज्रासनं अनुभवविरोधि
तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योचिं ॥ त॥ ॥तथावज्रयथासने ॥कृत्वा संपुटितौ करौ दृढतरं वध्वाच पद्मासनं गाढं वक्षसि सं
॥१३२॥ निधाय चिवुकं ध्यानं च तच्चेतसि ॥ वारंवारमपानमूर्द्धमनिलं प्रोत्सारयेत्प्राणमुत्थ
तिबोधमिति नियत शक्तिप्रबोधोदया ॥इति षड्गानवप्रोक्ता आदिनाथेन शंभुना
एकैकातासुयमिनां महासिद्धिप्रदायिनी ॥ ॥द्व्यासेय ॥अभ्यास भेदतो भेदःफ
लं तु सममेव हि ॥अभ्यासक्रम श्लोकः पवन संयमे ॥ महामुद्रां समभ्यस्य महाबन्धं ततः
परं ॥ महावेधं च नियतं प्रकुर्याच्छक्तिचालनं ॥ आसनं सुदृढं वध्वा मूलबन्धं विधाय ॥गुरु॥
च ॥ उड्डियानं तथा वध्वा ततो जालंधराभिधं ॥ अभ्यसेदिति संबन्धः ॥ ॥हठप्रदीप ॥१३२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यं ॥ मूलस्थानं समाकुंच्य उड्डियानं तु कारयेत् ॥ इडां च पिंगलां बध्वा वाहयेत्पश्चिमे प
थि ॥ अनेनैव विधानेन सेवयेत्पवनालयं ॥ ततो न जायते मृत्युर्जरारोगादि तथास्ति ॥ ॥
योगविजे ॥ चतुर्णामपि भेदानां कुंभके समुपस्थिते ॥ बन्धत्रयमिदं कार्यं वक्ष्यमाणं मयास्फु
टं ॥ पूरकान्ते तु कर्तव्यो बन्धो जालंधराभिधः ॥ कुंभकान्ते रेचकादौ कर्तव्यस्तूड्डियानकः ॥
अधस्तात्कुंचनेनाशु कंठसंकोचनेन च ॥ मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ॥ अ
पानमूर्ध्वमुत्थाप्य प्राणं कंठादधो नयेत् ॥ योगी जराविमुक्तः सन्वयस्कः षोडशो भवे
त् ॥ उड्डियानस्य साहजिकत्वात् कुंभकदशायां कर्तव्यं ॥ अत्र केचित् ॥ यद्यपि कपिला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो. चिं.
१३२

दिसिद्धानामेव महामुद्रादयः समतानयाज्ञवल्क्यादिमुनीनां तथापि साधारणेनैवोध॑ः
व्याइत्याऊ ॥ तन्तुग्रंथा थविवो धधिधुरं ॥ न यांहि ॥ नादोन्यान्निप्रकारो ॥ अपानमूर्द्ध्वमाकृष्य
प्राणेनसमाहितमृतीन्यक्त्रमूलवंधः कंठतस्ये वोक्तः ॥ तदुक्त्या च तन्तस्मंधिनाबुद्धियात
लधराकपिप्राप्तेः एकसमयावच्छेदेनक्यारणामनुष्ठानस्यपूर्वं दर्शितत्वात ॥ किंच ॥
जिह्वायां वायुमानीय जिह्वामूले निरोधयेत् ॥ यः पिबेदमृतं विद्वान्सकलं भद्रमश्नुते
उत्पच्छेरवेचरीं विनाऽमृतपानानुपपत्तेः स्पष्टत्वात् ॥ तस्मात्सांनियाज्ञवल्क्यादीनामपि
मुद्रात्रयाभिप्रेता ॥ प्रतिपादनं तु यथाक्रमे पुनिः सिद्धत्वाद्विशेषेणानुक्तमेवेत्यवधेयं ॥ उ

गुरु
१३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दानीं पूर्वोक्तं बाह्याभ्यन्तरसाधनसंपत्त्या धारस्युड्राचक्रादिज्ञानवतो मुमुक्षोश्चित्तशु
द्धिद्वारा मोक्षसाधनीभूततत्त्वज्ञानोपाययोगानि योगांगानि निरूप्यंते ॥ तथा च पातंजले
॥ योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेरिति ॥ वक्ष्यमाणानां योगांगा
नामनुष्ठानादा विवेकख्यातेरशुद्धिक्षये चित्तसत्त्वस्य प्रकाशावरणाक्लेशाख्याया अशु
द्धेर्नाशे सति याभवति ज्ञानदीप्तिः सात्विकः परिणामो विवेकख्यातिपर्यन्तः स तस्या विवेक
ख्यातेर्हेतुरित्यर्थः ॥ योगांगोद्देशपरं च सूत्रं ॥ यमनियमासनप्राणायामप्रत्याहारधारणा
ध्यानसमाधयोऽष्टावंगानीति ॥ याज्ञवल्क्यः ॥ वक्ष्याम्यंगानि ते सम्यक्यथापूर्वं मयाश्रु:

तं ॥ समाहितमना गार्गि ऋषिभिः सह संश्रता ॥ यमश्च नियमश्चैव आसनं च तथैव च
॥ प्राणायामस्तथा गार्गि प्रत्याहारश्च धारणा ॥ ध्यानं समाधिरेतानि योगांगानि वरानने ॥
यमश्च नियमश्चैव दशधा संप्रकीर्तितः ॥ आसनान्युत्तमान्यष्टौ त्रयं तेषूत्तमोत्तमं ॥ प्रा
णायामस्त्रिधा प्रोक्तः प्रत्याहारश्च पंचधा ॥ धारणा पंचधा प्रोक्ता ध्यानं षोढा प्रकीर्ति
तं ॥ त्रयं तेषूत्तमं प्रोक्तं समाधिस्त्वेकरूपतः ॥ कठवाके विाटकं तिविस्तरेण एथकं
तः ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं ॥ क्षमा धृतिर्मिताहारः शौचं चेति यमा दश
॥ कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ॥ अक्लेशजननं प्रोक्तं अहिंसा सैव योगिभिः ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यंभूतहितंप्रोक्तंमयथार्थाविभाषणां। कर्मणामनसावाचापरद्रव्येषुनिःस्पृहा
अस्तेयमितितत्प्रोक्तंऋषिभिस्तत्वदर्शिभिः। कर्मणामनसावाचासर्वावस्थासु
सर्वदा। सर्वत्रमैथुनत्यागोब्रह्मचर्यंप्रचक्षते। ब्रह्मचर्याश्रमस्थानांयतीनांनैष्ठिक
स्यच। ब्रह्मचर्यातुसेवोक्तातथैवारण्यवासिनां। ऋतावृत्तौस्वदारेषुसंगतिर्याविधा
नतः। ब्रह्मचर्यातुसेवोक्तागृहस्थाश्रमवासिनां। राज्ञश्चैवगृहस्थस्यब्रह्मचर्यं
प्रकीर्तितं। अध्यथाचयसेनित्यंब्रह्मब्रह्मचर्यमुदाहृतं। दयाचसर्वभूतेषुसर्वत्रानुग्र
हःस्मृत। विहितेषुतदन्येषुमनोवाक्कायकर्मभिः। प्रवृत्तोवानिवृत्तोवाएकरूपत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्जवं॥ प्रियाप्रियेषु सर्वेषु समत्वं यच्छरीरिणां॥ क्षमा सैवेति विद्वद्भिर्गदिता वेदवा-
दिभिः॥ अर्थहानौ च बंधूनां वियोगेप्यपि संपदि॥ तयोः प्राप्तौ च सर्वत्र चित्तस्य स्था-
पनं धृतिः॥ अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनां॥ द्वात्रिंशत्तु गृहस्थस्य यथे-
ष्टं ब्रह्मचारिणां॥ एषा मयं मिताहारो ह्यन्यथामल्पभोजनं॥ शौचं च द्विविधं प्रोक्तं बाह्य-
माभ्यन्तरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिस्तथान्तरं॥ मनःशुद्धिश्च विज्ञेया ध-
र्मेणाध्यात्मविद्यया॥ अध्यात्मविद्या धर्मश्च पित्राचार्येण वा नृप॥ तपः संतोष आ-
स्तिक्यं दानमीश्वरपूजनं॥ सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतं॥ एते तु नियमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ःपोक्तासांश्वसर्वार्थकथ्युराः॥ विधिनोक्तेनमार्गेणकृच्छ्रचान्द्रायणादिभिः॥ शरी
रशोषणंप्राहुस्तापसास्तपउत्तमं॥ इदंतुयोगाभ्यासायोगेकष्टप्रदम्॥ अभ्यासकालेका
यक्लेशोपवासादीनांनिषेधात्॥ भगवद्गीतोक्तमौनादिलक्षणंग्राह्यते॥ ॥तथाहि॥ दे
वद्विजगुरुप्राज्ञपूजनंशौचमार्जवं॥ ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते॥ अनुद्वेगक
रंवाक्यंसत्यंप्रियहितंचयत्॥ स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते॥ मनःप्रसादःसौ
म्यत्वंमौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपोमानसमुच्यतेइति॥ ॥याज्ञव
ल्क्यः॥ यदृच्छालाभतोनित्यमलंपुंसोभवेदिति॥ मतिस्तामृषयप्राहुःसंतोषंसुखलक्ष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णां ॥ धर्मो धर्मेषु विश्वासो यस्य स दास्तिक उच्यते ॥ न्यायार्जितं धनं चान्नमन्नं दायं प्रदी
यते ॥ अर्थिभ्यः श्रद्धया युक्तं दानमेतदुदाहृतं यत्प्रसादस्वभावेन विष्णुं वा रुद्रमेव
वा ॥ यथाशक्त्यर्चनं भक्त्या एतदीश्वरपूजनं ॥ सिद्धान्तश्रवणं प्रोक्तं वेदान्तश्रवणं
बुधैः ॥ द्विजवत्क्षत्रियस्योक्तं सिद्धान्तश्रवणं बुधैः ॥ विप्राणां च केचिदिच्छन्ति शी
लं हन्ति वर्णानां सतां ॥ शूद्राणां च यथाश्रेष्ठे वत्स धर्मस्थतपस्विनां ॥ सिद्धान्तश्रवणं प्रोक्तं पु
पुराणश्रवणं बुधैः ॥ वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् ॥ तस्मिन्भवति या लज्जा
ह्रीस्तु सैवेति कीर्तिता ॥ विहितेष्वेव सर्वेषु श्रद्धया या मतिर्भवेत् ॥ गुरुणा त्वोपदिष्टोपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पिबेद्वाह्यविवर्जितः॥ विधिनोक्तेनमार्गेणमन्त्राभ्यासोजपस्मृत॥ स्त्रीन्यवेदसूक्तंवापुरा
णांसेतिहासकं॥ पदेष्वध्ययनंतच्चसदाभ्यासोजपःस्मृतः॥ यत्तिविषयेभ्यस्ताश्चेयो
विशेषमाह॥ अस्तेयंब्रह्मचर्यंचत्यागोलोभस्तथैवच॥ व्रतानिपंचभिक्षूणामहिंसा
परमाणिवै॥ अक्रोधोगुरुशुश्रूषाशौचमाहारलाघवं॥ नित्यंस्वाध्यायइत्येतेनिय
माःपश्चकीर्तिताइति॥ पातञ्जलेपि॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमा
॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाइति॥ गरुडपुराणे॥ आ
नृशंस्यमनालस्यंवैराग्यंचार्जवंपरं॥ अचापलंधृतिःसत्यंज्ञानंचैवयमंविदुः॥ अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो॰ चिं॰ ॥
॥ १२ ॥

त्रान्दशंस्य घातकत्वाभावः ॥ शौचमाहारनियमो निर्ममत्वमसंगता ॥ शमः क्षमा दमः
सन्तुष्टिरित्यष्टौ नियमाः स्मृताः ॥ अथासनं ॥ तत्र पतंजलिः ॥ स्थिरसुखमासनम् ॥
॥ आस्यते ऽनेनेत्यासनं पद्माद्य ॥ तद्यदा निःकम्पं सुखमनुद्वेजनीयं च भवति तदा यो
॥ गांगतां भजते ॥ तथास्यैवास्थिरसुखापन्नार्थं सूत्रं ॥ प्रयत्नशैथिल्यसमापत्तिभ्यामिति
॥ तत्रानंत्येतिभावप्रत्ययांतपाठ इति ॥ भोजदेवः ॥ प्रयत्नशैथिल्येनानंत्यसः
मापत्त्या च स्थिरं सुखं च भवतीति संबंधः ॥ यदा यदासनं बध्नामीति प्रयत्नशैथि
ल्ये ऽप्यक्लेशेनैव निःपद्यते ॥ यदा चाकाशगतस्यानंत्ये चेतसः समापत्तिः क्रियते ॥

॥ गुरु ॥
॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अवधानेनतादात्म्यमापद्यते तदोदेहाहंकाराभावान्मासनं सुखजनकं भवति ॥ अभि
भ्यासनजये मतिसमाध्यंतरायभूतानष्टभवं त्यगमेजयत्वादयः ॥ अनन्तसमाप
त्तिभ्यामिति भावप्रत्ययरहितः सूत्रपाठ इति भाष्यसंप्रदायः ॥ अत्रानन्ते नागना
यके स्थिरतरे फणासहस्रविधृतविश्वंभरामंडले समापन्नं चित्तमासनं निवर्त्तय
तीति व्याख्यानमिति वाचस्पतिमिश्राः ॥ आसनसामान्यलक्षणं तु करचरणासं
स्थानविशेषस्यासनमिति विशेषलक्षणं तु धर्मपद्मिकायां ॥ स्थानत्वोभूतले पा
दावासनस्थेन योगिना ॥ दक्षिणां वामभागे तु वामपार्श्वे तु दक्षिणे ॥ अन्योन्याभिमु

॥यो·चिं॥
॥१३८॥

ढं कृत्वामृगशीर्षकरद्वयं ॥ योगसंसिद्धिहेतोस्तुमृगस्वस्तिकमुच्यते ॥ तलपादेनवामे
नजानुनादक्षिणेनच ॥ स्थित्वाहस्तपुटंकार्यमर्द्धचंद्रासनंविदुः ॥ भुविस्थित्वातु
जानुभ्यांतावन्मात्रेणयोगिना ॥ हृदिहस्तपुटंकार्यंज्ञेयमंजलिनासनं ॥ मुखवत्प्र
सारितौपादौसुश्लिष्टौभूमिसंस्थितौ ॥ उपविश्यपार्ष्णीकार्यंतुदण्डासनमितिस्मृतं
॥ आसनस्थेनपादौद्वौन्यस्यतौभूतलेसमौ ॥ जानुद्वयेहस्ततलंकृत्वापीठासनंभवे
दिति ॥ मतंगम ॥ पर्यंकयोगपट्टेनबद्ध्वायात्स्वस्थयोगतः ॥ आकुंच्यजानुनीसम्य
क्पादंकृत्वातुदक्षिणं ॥ वामहस्तेतोवामजंघायांवामंसंस्थाप्यदोर्बहिः ॥ किंचिच्छिद्रं

॥गुरु॥
॥१३८॥

निर्गतं कृत्वा नं नि[illegible]नाम्बवै कटिं ॥ पर्यंकमिति विख्यातमासनं योगसिद्धिदं ॥ ध्रुवेने
य पुरारोग ॥ पादौ द्वौ द्विगुणौ कृत्वा तिर्यग्गूर्ध्वं यथाक्रमं ॥ न्यसेत्पाणीय थायदृस्थितः
श्लिष्टांगुलीनरैवा ॥ योगपद्मासनं स्तेन तत्सर्वेषामपि पूजितमिति ॥ चंद्रार्द्धे लेशातः ध्रु
वः ॥ तद्वत्पादद्वयं कृत्वा उत्तला न्यसंस्थितं ॥ चंद्रार्द्धमेवं कथितमिति ॥ तद्वत्प
द्मासनबद्ध्वा गुरोः पादद्वयं कृत्वेत्यर्थः ॥ तद्वत्पादद्वयं कुर्यात् तन्मुखं तु प्रसारयामि
ति ॥ [illegible]तो मुपधानस्थं संप्रसार्य करद्वयं ॥ प्रसारितासनं त्वेतत्कथितं योगसिद्धि
दमिति ॥ वह्नि[illegible]गुदं निपम्य गुल्फाभ्यां वृतक्रमेणासमाधिस्थितः ॥ कूर्मासनं भवेत्तत्

यो॰ चिं॰ वदंति योगविदो विदुः ॥ कूर्मपुराणे ॥ एकं पादमथैकस्मिन्विन्यस्योरसिसत

१३८ त्तमः ॥ आसीतार्द्धासनमिदं योगसाधनमुत्तमम् ॥ याज्ञवल्क्यः ॥ जान्वोरन्तरे सम्य

क्कृत्वा पादतले उभे ॥ ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥ सीवन्यामात्मन

ः पार्श्वे गुल्फौ निक्षिप्य पादयोः ॥ सव्ये दक्षिणगुल्फं तु दक्षिणे दक्षिणेतरं ॥ एत

त्स्वस्तिकं प्रोक्तं सर्वपापप्रणाशनं ॥ सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत्

॥ दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ॥ एकपादमथैकस्मिन्विन्यस्योरुणि सं

स्थितः ॥ इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतं ॥ गुल्फौ च वृषणस्याधः सीवन्या गुरू

१३८

ःपार्श्वयोः क्षिपेत् ॥ दक्षिणासव्यगुल्फेन दक्षिणेनानतथेतरं ॥ हस्तौ जानूपरिस्था
प्यस्वांगुलीः संप्रसार्य च ॥ व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥ सिंहासनं भ
वेदेतत् पूजितं योगिभिः सदा ॥ गुल्फौ च वृषणस्याधः ॥ सीवन्याः पार्श्वतः क्षिपेत् ॥
पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः ॥ भद्रासनं भवेदेतत् सर्वव्याधिवि-
षापहं ॥ पीडयेत् सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः ॥ सव्यं दक्षिणगुल्फेन मुक्तासन
मितीरितं ॥ अवष्टभ्य धरां सम्यक् तलाभ्यां करयोर्द्वयोः ॥ हस्तयोः कूर्परे चापि
स्थापयेन्नाभिपार्श्वयोः ॥ समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ॥ मयूरासनमे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो. चिं ॥
॥ १४ ॥

तदेव सर्वपापप्रणाशनं ॥ सर्वे चाभ्यन्तरा रोगा विनश्यंति विषाणि च ॥ हठप्रदीपि-
कायां ॥ वशिष्ठाद्यैश्च मुनिभिर्मत्स्येंद्राद्यैश्च योगिभिः ॥ अंगीकृतान्यासनानि
च कथ्यन्ते कानिचिन्मया ॥ हठस्य प्रथमांगत्वादासनं पूर्वमुच्यते ॥ तत्कुर्यादासनं
स्थैर्यमारोग्यं चांगलाघवं ॥ पद्मासनं तु संयोज्य जानूर्वोरन्तरे करौ ॥ निवेश्य
भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनं ॥ कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कं-
धरां भवेत्कूर्मवदुत्तान एतदुत्तानकूर्मकं ॥ पादांगुष्ठौ च पाणिभ्यां गृहीत्वा श्रव-
णावधि ॥ धनुराकर्षणं कृत्वा धनुरासनमीरितं ॥ वामोरुमूलार्पितदक्षपादं

॥ गुरु ॥
॥ १४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जान्मो वहिर्वेष्टितवामपादं प्रगृह्य तिष्ठेत्परिवर्त्तितांगः श्रीमत्स्यनाथोदितमास
नं स्यात् ॥ मत्स्येन्द्रपीठं जठरप्रदीप्तिं प्रचंडरुग्मंडलखंडनास्त्रं ॥ अभ्यासतः कुंडलिनी
प्रवोधं चंद्रस्थिरत्वं विदधाति पुंसां ॥ प्रसार्य पादौ भुवि दंडरूपौ दोर्भ्यां च पादद्वितयं
गृहीत्वा ॥ जानूपरिन्यस्तललाटदेशोऽभ्यसेदिदं पश्चिमतानमाहुः ॥ इति पश्चिम
तानमासनाग्र्यपवनं पश्चिमवाहिनं करोति ॥ उदयं जठरानलस्य कुर्यादुदरे कार्श्यम
रोगितां च पुंसां ॥ धरामवष्टभ्यपरः कराभ्यां तत्कूर्परे स्थापितनाभिपार्श्वः * तदासने
दंडमिवास्थितः खे मयूरमेतत्प्रवदन्ति सन्तः ॥ हरति सकलरोगानाशु गुल्मोदरादी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नभिभवतिचदोषानासनंश्रीमयूरं ।। वऊकदशनभुक्तंभस्मकुर्यादशेषंजनय
तिजठराग्निंजारयेत्कालकूटं ।। उत्तानशववद्भूमौशवासनमिदंस्मृतं ।। शवासनं
श्रांतिहरंचित्तविश्रांतिसाधनं ।। भूमौस्वमस्तकेस्थाप्यहस्तयोःकूर्परेतथा ।।
पादौरवेदराडवत्कुर्यान्नरःकामसनमीरितमिति ।। स्कंदपुराणे ।। आसनानीहतावंति
यावंतोजीवयोनयः सिद्धंसैकतयापद्मंतेषुश्रेष्ठंसिद्धसिद्धिदे ।। गोरक्षः ।। चतुराशी
तिलक्षाणामेकैकंसमुदाहृतं एतेषामपिविज्ञानंभेदान्विजानातिमहेश्वरः त
तःशिवेनपीठानांषोडशोनशतंकृतं आसनेभ्यःसमस्तेभ्योद्वयमेतदुदाहृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकं सिद्धासनं ॥ प्रोक्तं द्वितीयं कमलासनं । हठप्रदीपिकायां ॥ चतुराशीत्यासनानि शि
वेन कथितानि वै ॥ तेभ्यश्चतुष्कमादाय सारभूतं ब्रवीम्यहं ॥ सिद्धं पद्मं तथा भद्रं सिं
हं चेति चतुष्टयं ॥ श्रेष्ठं तत्रापि पश्यंति सुसिद्धासनेन सदा ॥ भद्रसिंहासनेन पूर्वमुक्ते ॥
याज्ञवल्क्यः ॥ दक्षिणोत्तरगुल्फेन सीवनीं पीडयेत् स्थिरं ॥ अधस्तात् दंडयोः सूक्ष्मांस
योपरि च दक्षिणां ॥ जंघोर्वोरंतरं गार्गि निष्ठिड्डं वेधयेद्दृढं ॥ समग्रीवशिरः स्कंधः स
मपृष्ठः समोदर ॥ नेत्राभ्यां दक्षिणांगुष्ठं लोकयन्नुपरिस्थितं ॥ एतत्सिद्धासनं नाम
शीघ्रसिद्धिविधायकं ॥ तथा सव्येन गुल्फेन गुदं निपीड्य सव्येतरेणाव निद्ध्यम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धिं॥ तद्भेतोरन्यस्तकोटरेतरस्मिन् शिरवां समालोकयेदकस्य॥ आयुर्विघ्नातकृन्त्वारो
निरुक्तस्यासनेनैव॥ यागाग्नितत्पानानुकूलं वद्वै॥ शनैः शनैः॥ पवनयोगसंग्रहे॥ योनिस्था
नकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रेपादमथैकमेकहृदयः कृत्वा समं विग्रहं स्था
णुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तरं चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रो
च्यते॥ तथा॥ मेढ्रात्तु परि विन्यस्य सव्यं गुल्फं तथोपरि॥ गुल्फान्तरं तु विन्यस्य सिद्धासनमि
दं भवेत्॥ एतत्सिद्धासनं प्राहुः पद्मासनमथो विदुः॥ गुप्तासनं वदन्त्येके प्राहुर्वज्रा
सनं परे॥ केचिन्मुक्तासनं प्राहुरिदमासनमुत्तमं॥ हठप्रदीपिकायां॥ नियमेषु मिताहा

रोयथाऽहिंसायमेष्विव मुख्यंसर्वासनेष्वेवंसिद्धासनमिदंविदुः॥चतुराशीतिपीठेषुसिद्धा
सनेसमभ्यसेत्॥द्वासप्ततिसहस्रेषुसुषुम्णामिवनाडिषु॥आत्मध्यायीमिताहारीयाव[illegible]
[illegible]शवत्सरं॥सदासिद्धासनाभ्यासाद्योगीनिष्पत्तिमाप्नुयात्॥श्रमैदैर्वहुभिःपीठैःकिंस्याः
त्सिद्धासनेसति॥प्राणानिलेसावधानेवद्धेकेवलकुंभके॥उत्पद्यतेनिरायासात्स्वयमेवो
न्मनीयथा॥अथैकस्मिन्नेवदृढेवद्धेसिद्धासनेसदा॥वंधत्रयमनायासात्स्वयमेवोपजा
यते॥अथपद्मासन॥याज्ञवल्क्यः॥अंगुष्ठौचनिवध्नीयाद्धस्ताभ्यांव्युत्क्रमेणतु॥ऊर्वो
यित्वापरंब्रह्मलक्षत्वानतत्रवर्तांइति॥ येचव्याध्यकर्मणापतायोगफलवत्कृष्टांसंयप्रमादा
लविषयवैतृष्ण्याभ्रान्तिसमाधिभूम्यलाभ्यलाभचित्ताप्रतिष्ठास्तयोविघ्नाश्चित्तविक्षे
पकादितास्तेपिबलात्तत्संधानेनैवनिवर्त्तन्ते॥ ॥तदुक्तंपातञ्जले॥ ईश्वरप्रणिधानाद्वे
त्यादिनायोगनिरूपणानन्तरं॥ तस्यवाचकःप्रणवः॥ तज्जपस्तदर्थभावनं॥ ततःप्रत्यक्चे
तनाधिगमोऽप्यन्तरायाभावश्चेतिसूत्रैः॥ नचतदर्थभावनस्यापिसंयमरूपत्वेनतत्रापिविघ्ना

॥गुरुः॥
॥२०८॥
211

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वकाशः ॥ सर्वपापतूलानलरूपे भगवद्भजने विघ्नावकाशाभावात् ॥ ५ ॥ विष्णुपुराणेय
थाग्निरुद्धतशिखः कक्षं दहति सानिलः ॥ तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिष
मिति ॥ तथा प्रारब्धकर्मणां विशेषापरनामविघ्नानां सर्वेषामपि विक्षेपसहजन्मनां चेतःखेदो
र्मनस्यांगकम्पश्वासनिद्रादीनां निराशाय यथाभिमतध्यानसंतानमेव तन्नपादित्येतदु
क्तं ॥ तत्प्रतिषेधार्थमेकतत्त्वाभ्यास इति सूत्रेण ॥ वाशिष्ठे ॥ एते ते सन्महादोषाः
संसारव्याधिहेतवः मनागपि न तुद्यन्ति चित्तमेकं समाहितं ॥ आधिव्याधिसमुत्थानि चरित
तानि महाभ्रमे ॥ नहि संपतितुःखानि चित्तमेकं समाहितं ॥ परिस्फुरति यस्यान्तर्नित्यं सम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चमत्कृतिः॥ स्वप्रज्ञापराधमिवाख्यवरांदृग्गोष्ठाः पालयन्तितनाः॥ ॥आदिगुणरागो॥सम्यग्द
र्शनसंपन्नोनाभिभूयेनकर्मभिः॥ योगविघ्नागयुक्ता त्मापरंनिर्वाणमृच्छति॥ ॥अकनिष्ठ
नर्द्दियएवंवेदाहंखलाम्मीतिमयद॥ सर्वंभवतितस्यहननेदेवाश्चनाभूत्याईशतआत्माह्ये
षांसभवतीत्यादिकाश्रुतिः॥ किंच॥ मोक्षादर्वाक्जायमानाःसिद्धयस्ताअपिविघ्नरूपाएव
मन्तव्याः॥ सिद्ध्यासक्तमनसोयोगिनोमोक्षोदुर्ल्लभोयतः॥ ॥तथाचस्कन्दपुराणे॥अन्त
रायाभवन्तीहयोगिनोयोगहानिदाः॥ श्रूयतेद्रगवार्त्ताद्दूरस्थंदृश्यतेपुनः॥ योजनानां
शतंयातिशक्तिःस्यान्निमिषार्द्धतः॥ अद्विन्तिनानिशास्त्राणिकरात्पाठीभवन्तिहि॥ धारणा

॥गुह्॥
॥२०९॥

212

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिरणुयान्महाभारोलघुर्भवेत् ॥ क्षणां कृशः क्षणां स्थूलः क्षणामल्पः क्षणां महान् ॥ परकायं
प्रविशन्तिति रम्यो वेत्ति भीषितं ॥ दिव्यङ्गं स्ववन्तं तो धर्मे दिव्यां वाणीं प्रवक्तित्व ॥ प्रार्थ्यते दिव्यक
न्याद्दिभिर्दिव्यं प्रार्थयते वसुः ॥ इत्यादयोऽनन्तरायाः सुयोगसंसिद्धिसूचका ॥ यद्यभिरत्ना
राध्येर्न क्षिप्यते स्वहिमानसंततायेतन न माप्नोति १ देवस्ताद्दिदुर्द्धेभं ॥ न यत्नाप्यनिवर्त्तेत यत्न
प्यन चशोचति ॥ तद्वत्प्यते षडंगेन योगेन कस्तश्चोऽनुवेत्ति ॥ ॥ योगभास्करे ॥ जितेन्द्रियस्य
दान्तस्य जितश्वासस्य योगिनः ॥ हेरोधारयतश्चित्तमुपतिष्ठिन्त्य ॥ अणिमाद्याद्दिसिद्धयस्तुथ
रणाभिरूपामिता ॥ त्यजेन्त्र्थतयासर्वा यत्नसाविघ्नकारिका ॥ सिद्ध्याद्दिवासनाक्ष्वस्त नत्वोगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धुसंगतः॥ भद्रपीठाद्यग्रः स्थानात्प्रकृतावेवतिष्ठति॥ सात्त्विकीधृतिमान्त्यागीसत्त्वेनसु
स्थिरः॥ निर्गुणां मनसा ध्यायन्नुपसर्गैः प्रमुच्यते॥ एवं योगमुपासीनः शक्रादिपदनिस्पृहः॥
सिद्ध्यादिवासनात्यागी जीवन्मुक्तो भवेन्मुनिः॥ विस्तरस्य भयान्नोक्ताः सन्ति विघ्ना ह्यनेकशः
ध्यानेन हरिहरयोर्वा रणीयाहि योगिना॥ इति सर्वशास्त्रसिद्धान्तः॥ एवं च परमेश्वरानुगृही
तस्य निर्विघ्नं सांयोगमातिष्ठवतो योगिनो विश्वासार्थं परीक्षार्थं च क्रमेणामोक्षावान्तरफल
सिद्धयो ह्याविर्भवन्ति पञ्चप्रकाराः लोके सिद्धयो भवन्ति॥ ॥तथा च पतञ्जलिः॥ जन्मौषधि
मंत्रतपःसमाधिजाः सिद्धय इति॥ यक्षादीनामाकाशगमनादि तक्षणात्कपिलादीनां जन्म

213

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम।नन्तरमेवोपजायमानादिज्ञानलक्षणाजन्मसिद्धिः। पातालादौरसायनाद्युपयो
गलक्षणौषधसिद्धिः केषांचित्। आकाशगमनादिफला मंत्रसिद्धिः। विश्वामित्रादी
नां तपःसिद्धिः। याज्ञवल्क्यादियोगिनां समाधिसिद्धिः। तत्र जन्मादिसिद्धीनां सर्वासाम
पि जन्मान्तराभ्यस्तसमाधिसिद्धिरेव हेतुः। मंत्रादिकं तु निमित्तमात्रमेवेत्यवधेयं। यथ
नंदीश्वरादीनामिहैव जन्मनि जात्यादिपरिणामो यः स प्रकृत्यापूरात्। पश्चात्तस्यैव हि
प्रकृतयो जन्मनि स्थूलभूतात्मदेहेन्द्रियलक्षणान्विकारान्जात्यन्तरादिगुणापूर
यन्ति। क्रियमाणां धर्मादिप्रकृतीनामापूरणेन प्रयोजकं किंतु न आवरणभूताधर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यो भवति यथा कृषीवलस्य सेतुभेदमात्रेण्यापो रेजलानिःसरणं स्वतस्त्वेवं ततो न पूर्वोक्तजन्मा
न्तराभ्यस्तसमाधिकारणाभ्रूप्रसंगः ॥ ॥ तथा च पतंजलिः ॥ जात्यन्तरपरिणामः प्रकृत्या
पूरान्निमित्तमप्रयोजकं प्रकृतीनां आवरणभेदस्तु ततः क्षेत्रिकवदिति सूत्राभ्यां ॥ ॥ योग
भास्करे ॥ जन्मौषधितपोमंत्रैर्यावन्तः इह सिद्धयः ॥ योगनाप्नोति ताः ॥ सर्वाणान्यैर्योगगनि
ऽजेन ॥ ॥ योगवीजे ॥ अभ्यासस्य फलं देवि कथयामि तवाधुना ॥ आदौ रोगाः प्रणश्य
न्ति पश्चाज्जाड्यं शरीरजं ॥ ततः समरसीभूत्वा चंद्रो वर्षत्यनारतं ॥ धातुरसंग्रहेद्वह्निः पवने
न समन्वितः ॥ नानानादाः प्रवर्त्तन्ते मार्दवं स्यात्कलेवरे ॥ जिन्वा भूपथ्यादिकं जाड्यं खेचरं स्व

214

मन्त्रेश्वरः ॥ सर्वज्ञो सो भवेत्कामरूपपवनवेगवान् ॥ क्रीडति त्रिषु लोकेषु जायन्ते सिद्धयोऽखि-
ला ॥ कर्पूरे लीयमाने कौं काठिन्यं न च विद्यते ॥ अहंकारं जयेत् तद्वद्देहे काठिन्यता कुतः ॥ सर्व-
ज्ञः सर्वकर्त्ता च स्वतन्त्रो विश्वरूपवान् ॥ जीवन्मुक्तो महायोगी जायते नात्र संशयः ॥ दे-
व्युवाच ॥ यत्किंचित्कल्पनाजालं तत्तन्मे कथय शंकर ॥ सिद्धयः किं करिष्यन्ति निर्विक-
ल्पे चिदात्मनि ॥ एनं मे संशयं नाथ छेत्तुमर्हसि पावन ॥ ईश्वर उवाच ॥ सत्यमेतत्त्वया
क्तं ते वदामि शृणु सुन्दरि ॥ द्विविधाः सिद्धयो लोके कल्पिताकल्पिताः शिवे ॥ रसौषधिक्रि-
याकालमन्त्रयन्त्रादिसाधनात् ॥ सिध्यन्ति सिद्धयो यास्तु कल्पितास्ताः प्रकीर्तिताः ॥ अनि-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो॰ चिं॰ ॥
॥ २१२ ॥

स्या ग्रुरुसवीर्यास्ताः सिद्धयः साधनोद्भवाः॥ साधनेन विना ह्येवं जायन्ते स्वत एव हि॥
स्वात्मयोगैकनिष्ठेषु स्वातंत्र्यादीश्वरत्वतः॥ प्रभूताः सिद्धयो यास्ताः कल्पनारहिताः
स्मृताः॥ सुस्थानित्या महावीर्या इच्छारूपाः स्वयोनिजाः॥ चिरकालात्प्रजायन्ते वासनारहि
तेषु च॥ तास्तु भाव्या महायोगपरमात्मपदाश्रये॥ विना सूर्यं यथा दीप्तिर्योगसिद्धस्य लक्षणं य
थाकाशीं समुद्दिश्य गच्छद्भिः पथिकैः पथि॥ नानातीर्थानि दृश्यन्ते तथा मोक्षे तु सिद्धयः॥
स्वयमेव प्रजायन्ते लाभालाभविवर्जिते॥ सिद्धिर्लक्षयेत्सिद्धिं जीवन्मुक्तिस्तथैव च॥ अलौ
किकगुणास्तस्य कदाचिद्दृश्यते ध्रुवं॥ इत्येतत्कथितं देवि योगसिद्धस्य लक्षणं सिद्धिभिः परि

215

॥ गुरुः ॥
॥ २१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हीनं तेन रंवद्धं तु लक्षयेत ॥ अजरामरपिंडो यो जीवन्मुक्तः स एव हि ॥ ये श्वकुक्कुटकीटाद्या
मृतिं संप्राप्नुवंति वै ॥ तेषां किं पिंडपातेन मुक्तिर्भवति सुंदरि ॥ न वहिः प्राणा आयाति पिंडस्य
पतनं कुतः ॥ पिंडपातेन या मुक्तिः सा मुक्तिर्न तु हन्यते ॥ देहे ब्रह्मत्वमायाति जलतां सैंधवं
यथा ॥ अनन्यतां यदा याति तदा मुक्तः स उच्यते ॥ ॥ मानसो ह्यात्मस ॥ चित्ते निश्चलतां या
ति प्राणा मध्ये लयं यते ॥ विज्ञान्यो तानि जायन्ते पंचभूतजयात्तथा ॥ मलमूत्रकफाल्प
त्वमारोग्यं लघुता तनौ ॥ सुगंधः स्वरसौवर्ण्यं प्रथमं योगलक्षणं ॥ कराग्राकाग्रेप्यसंग :
त्वं जलपंकेष्वमज्जनं ॥ क्षुत्तृषादिसहिष्णुत्वं द्वितीयं योगलक्षणं ॥ बहुन्नपानभोक्तः

त्वमानपायिसहिष्णुता । दर्शनं श्रवणं दूरात्तृतीयं योगलक्षणं । मराङ्फलवनं भूमौ मर्कटप्लव
नं मे ह्याकाशगमनं चेति चतुर्थं योगलक्षणं ॥ ज्ञानं त्रिकालविषयमैश्वर्यमणिमादि
कं । अनन्तशक्तिमत्त्वं पञ्चमं योगलक्षणं ॥ अथाणिमादिलक्षणं ॥ अणिमा
महिमा चैव लघिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ अ
त्यन्तमहत्सु प्राप्तिः स्वात्मत्वेन प्रवेशनं । अणिमा संज्ञमैश्वर्यं व्याप्तस्य परमात्मनः । अला
णादिशिवान्ताया षट्त्रिंशत्तत्त्वसंहतेः । बहिश्च व्याप्यवृत्तित्वमैश्वर्यं महिमाह्वयं । मह
मेरुसमं गम्यमसकृद्रणकर्मिता । गौरवं मेरुतुल्यत्वं गरिमा सांविदुर्बुधाः । पातालवासि

216

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नःपुंसो ब्रह्मलोकावलोकनं ॥ प्राप्तिर्नाम महैश्वर्यं सुदुःप्रापमयोगिनां ॥ आकाशगमनादि
नामन्यासां सिद्धिसंपदां ॥ स्वेच्छामात्रेणासां सिद्धिः प्राकाम्यमभिधीयते ॥ स्वशरीरस्य काये
सर्वानर्थानानां प्रकाशनं : प्राकाम्यमि[illegible]मैश्वर्यमिति केचित् प्रवक्षते ॥ स्वेच्छामात्रेणा
लोकानां सृष्टिस्थित्यन्तकर्तृता सूर्यादीनां नियोक्तृत्वमीशित्वमभिधीयते ॥ स लोक
पालाः सर्वेपि लोकाश्च वशवर्तिनः ॥ तदैश्वर्यं वशित्वाख्यं सुलभं शिवयोगिनां ॥ स
र्वात्मभावसाम्राज्यनिरंतरितचेतसां ॥ परिपक्वसमाधीनां किं किं नाम न सिध्य
ति ॥ यस्यैवं ब्राह्मयोगो वेत्ति तस्य दवा वशे स्थिताः ॥ किं पुनः क्ष्मापतित्वाद्युच्चाल्पसिद्धी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषारयः ॥ अर्वाचीनेष्वप्यनुभवेत्फलेस्वर्गादिसंभवे ॥ स्वर्गादिराज्यंसाम्राज्यंमन्तुनेनहिद्वि
नः ॥ तदेवतस्यसाम्राज्यंयत्रसाम्राज्यमात्मनि ॥ पुत्रपौत्रगृहक्षेत्रधनधान्यसमृद्धयः ॥ अ
र्वाचीनाश्चसिध्यंतिस्वर्गपातालभूमिषु ॥ पाकेप्रवर्त्तमानस्यशीतादिपरिहारवत् ॥ प्रासं
गिकाश्चसिध्यन्तियोगाभ्यासेनसर्वदा ॥ ऐश्वर्यमीश्वरत्वंचतस्यनास्तिपृथक्स्थितिः ॥
पुरुषेधावमानेपिछायानमनुधावति ॥ अनंतशक्तिरैश्वर्यंनित्यंदृश्याणिमादयः ॥ स्वस्य
श्वरत्वेसंसिद्धेसिध्यन्तिस्वयमेवहि ॥ पुष्पमानयतीगंधोविनेच्छामनुभूयते ॥ पूर्णाहं
भावयुक्तेनपरिछिन्नाविभूतयः ॥ मदीयेश्वर्यविस्फूर्त्तिर्ब्रह्माविष्णुक्रियादयः ॥ ऐश्वर्यं

2 1 7

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वंतोभासन्नेसहवात्मासदाशिवः॥ सर्वात्मभावनावन्तंसेवन्तेसर्वसिद्धयः॥ तस्मादात्मनि
साम्राज्यंकुर्यान्नियतमानसमुनि॥ लयखंडेपिसमाध्यभ्यासनिरूपणपूर्वकंतदभ्यास
क्रमेणैवसिद्धिक्रमश्चोक्तः॥ तथाहि॥ विविक्तदेशेसुखसंनिविष्टःसमासनेकिंचिदुपे
त्यपश्चात्॥ बाह्यप्रमाणांस्थिरदृक्च्छथांगश्छिन्नाविहीनोऽभ्यसनंकुरुष्व॥ सुखासने
समासीनस्तत्राभ्यासंसमाचरेत्॥ सदाभ्यासेनतन्कुर्यात्परतत्त्वप्रकाशनं॥ ब्रह्माणं
पंचभूतस्थंपंचभूतमयीतनुः॥ सर्वभूतमयंचेतिनित्यज्ञानात्मेतिभावयेत्॥ न
किंचिन्मनसाध्यायेत्सर्वचिन्ताविवर्जितः॥ सदाह्याभ्यन्तरंयोगिजायतेनन्वसन्तुख

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वस्यसमुत्थेजातेत्वमनस्कंप्रजायते॥ अमनस्केतुसंजातेचित्तादिविलयोभवेत्॥
चित्तादिविलयेजातेपवनस्यलयोभवेत्॥ मनःपवनयोर्नाशादिंद्रियार्थंविमुञ्चति
इंद्रियार्थपरिमुक्तोवाह्यज्ञानंनजायते॥ वाह्यज्ञानेविनष्टेचततःसर्वसमोभवेत्॥
यदासर्वसमोजातोभवेद्व्यापारवर्जितः॥ परब्रह्मणिसंबद्धोयोगीप्राप्तलयस्तदा॥ स
दाभ्यासरतानांचलयःपरोजायतेलयः॥ तस्याहंकथयिष्यामिलक्षणंमुक्तचेतसः॥
सुखदुःखंनजानातिशीतोष्णंनचविंदति॥ विचारंचेंद्रियार्थानांनवेत्तिहिलयंगतः
नचजीवन्मृतोवापिनपश्यतिनमीलति॥ निर्जिवःकाष्ठवत्तिष्ठेल्लयस्थःसोभि·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लीयते ॥ निर्वातस्थापितो दीपो भासते निश्चलो यथा ॥ जगज्जालविनिर्मुक्तस्तथा
योगी लयं गतः ॥ यथा वातैर्विनिर्मुक्तं निश्चलं निर्मलं सरः ॥ शब्दादिविषयैस्त्यक्तो
लयस्थोऽरूपते तथा ॥ प्रक्षिप्तं लवणं तोये क्ष्मायद्वद्विलीयते ॥ मनोऽप्यभ्यासयोगे
न तद्वद्ब्रह्मणि लीयते ॥ लवणं तोयसंपर्कात्तथा तोयमयं भवेत् ॥ मनो ब्रह्मसंप
र्कात्तथा ब्रह्ममयं भवेत् ॥ यथा क्षाराब्धयत्नेन प्राप्यते लवणं क्वचं ॥ ब्रह्मज्ञानमय
त्वेन निर्वाणं मनस्तथा ॥ घृतात्पृथग्विरहितं घृते लीनं घृतं यथा ॥ तत्त्वे लीनं मनस्तथा
योगी एषम्भावं न विन्दति ॥ निमेषश्वासपलकैर्नाडीभिः प्रहरैर्दिनैः ॥ मासैः सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ यो॰ चिं॰ ॥
॥ २१८ ॥

वत्सरैः कालो लयस्यायत्सरं वुजेत ॥ श्वासोच्छ्वासात्मकः प्राणः षड्भिः प्राणैः पलं स्मृतं ॥
॥ पलैः षष्टिभिरेवं स्याद्घटिका कालसंमिता ॥ योगी निमेषमात्रेण लये न लभते ध्रुवं ॥
स्पर्शनं परतत्वस्याप्युत्थानं च पुनः पुनः ॥ घर्मं शान्तिः प्रजायेन तत्प्रकर्षेणैव मूर्छना ॥ नि
मेषकमात्रेण लयेनानन्तस्य योगिनः ॥ श्वासद्वयलयेनापि कूर्मनागादिवायवः ॥ निव
र्तन्ते च धातूनाचस्वं कुर्वन्ति धातुगं ॥ श्वासमात्रलयेनापि तेन प्राणादिवायवः ॥ श्वास
प्रवाहसञ्चारात् स्वस्वस्थाने वहन्ति ते ॥ चतुःश्वासलयेनापि सप्तधातुगतान्रक्षा ॥ सम्य
क्पुष्टिं प्रकुर्वन्ति धातूनां समवायवः ॥ लयेन पलमात्रेण श्वासानस्थानपि यन्ते ॥ स्व

॥ गुरु ॥
॥ ३४ ॥

219

न्यभ्यासो भवेद्योगी त्वल्पोन्येष्वपुनस्तथा ॥ पलद्वयलयेनापि ह्न्ताप्याश्च तनं तम्भेत् ॥ ध्वनाघ
तविज्ञेयो न नत्रैवन्यसेन्मनः ॥ चतुःपलश्रमारोनलयेनानुभवो भवेत् ॥ अकस्मान्निपतन्त्ये
व शब्दः कर्णौ शुभाशुभः ॥ पलाष्टकलयेनापि कामस्तस्य निवर्त्तते ॥ तथापि नैव जायेत कामि
न्यां लिङ्गितस्य च ॥ कलापादलयेनापि सुषुम्नामार्गवाहिनी ॥ कलापश्चिममार्गेण तस्याभ
विन गच्छति ॥ घटिकार्द्धलयेनापि शक्तिः कुण्डलिनी परा ॥ मनोवात निरोधेन जागर्त्याधार
संस्थिता ॥ कलामात्रलयेनापि शक्तेः संचलने न च ॥ क्षणार्द्धत्यपतेतस्य मनसः कंपनं सह
तु ॥ चतुःकलालयेनापि निद्रा वा न वर्त्तते ॥ हृदि स्फुरति स्वयं योगी तेजो विम्बं प्रपश्यति ॥ दि

दिनपादलयेनापि स्वल्पाहारो भवेन्नरः ॥ अल्पमूत्रपुरीषत्वं लघुतास्निग्धतानेनो ॥ वास
रार्द्धलयेनापि स्वात्मज्योतिः प्रकाशते ॥ सूर्योग्निर्भिरिवोद्दीप्तो योगीनत्वं प्रकाशते ॥ दिनमा
त्रलयेनापि स्वात्मतत्त्वं प्रकाशते ॥ इन्द्रियज्ञानविस्तारो ब्रह्माराड्प्यस्य वर्त्तते ॥ अहोरात्र
लयेनापि योगी स्वात्मनि संस्थितः ॥ चित्तवृत्तिनिरोधेन गन्धं ज्ञानाति दूरतः ॥ अहोरात्र
द्वयेनापि लयेनानन्तश्च योगिनः ॥ दूरदर्शनविज्ञानं स्वभावेनैव वर्त्तते ॥ अहोरात्रत्रयेना
पि लयानन्दः समुत्थितः ॥ दूरादपि रसं वेत्ति योगी सकलवर्जितः ॥ अहोरात्रचतुष्टये
नालयभावप्रभावतः ॥ स्पर्शं जानाति योगीन्द्रो दूरादपि न संशयः ॥ पञ्चरात्रलयेना

220

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितस्याप्युत्पद्यते ध्रुवं ॥ दूरश्रवणविज्ञानं मनस्याश्चर्यकारणं ॥ एतत्पंचेन्द्रियज्ञानम
हत्त्वानुभवात्मकं ॥ जानात्यनेन योगीन्द्रः सकलं विश्ववर्त्तनं ॥ षड्रात्रविलयेनापि महा
बुद्धिः प्ररोहति ॥ यथा तर्क्कामतीतं च विश्वज्ञानं प्रवर्त्तते ॥ सप्तरात्रलयेनापि परे लीनस्य
योगिनः ॥ स्याद्ब्रह्मविश्वेव तत्त्वं स्मृतिज्ञानं च वर्त्तते ॥ अष्टरात्रलयेनापि भवेद्योगी निरामयः
क्षुत्पिपासादिभावैश्च सहजस्थो न पीड्यते ॥ नवरात्रलयेनापि निर्वेदः स्वात्मवर्त्तिनः ॥ वा
वाक्सिद्धिर्भवेत्तस्य शापानुग्रहकारिणी ॥ दशरात्रलयेनापि योगीन्द्रः स्वात्मधिष्ठितः ॥
यानि कानि सुगुप्तानि मन्त्रविद्यानि पश्यति ॥ ततश्चैकादशाहेन लयस्थस्य जवोदयात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ यो. वि. ॥
२१८

मनसा सहितस्यापि गन्तुमिच्छति विग्रहः ॥ द्वादश्याहलयेनापि भूचरत्वं हि सिध्यति निमे
षार्द्धप्रमाणो न पश्यन्त्येव भूतलं ॥ ततस्त्रयोदशाहेन लयेनापि मूकतां ध्रुवं ॥ योगी दुःखे
चरीं सिद्धिं लभते चिरंतनामपि ॥ चतुर्दश्या दिनान्तं तु लयस्थो यदि तिष्ठति ॥ अणिमाख्या
स्य सिद्धिः स्यादणुत्वं प्राप्नुते यया ॥ आत्मनैवात्मना लीनो योगी षोडशवासरं ॥ लभ
ते महिमासिद्धिं समहारूपधृक् यथा ॥ सप्तदशाद्दिनान्तं च लयस्थो यदि तिष्ठति ॥ गरि
मा ख्यां लभेत्सिद्धिं यया भूभावधृक्यतः ॥ अभिन्नार्थो लयेनापि पञ्चविंशतिवासरं ॥ ल
घिमाख्यां लभेत्सिद्धिं येनाणुत्वस्य भारधृक् ॥ द्वाविंशति दिनानि स्यात् स्वात्मलक्ष्मे लयंग

221
॥ गुरुः ॥
॥ २१८ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तः॥प्राप्तिसिद्धिर्भवेत्तस्य प्राप्यते यो जगत्स्थितं ॥ परे लयं गतो योगी चतुर्विंशतिवासरा
न्॥ तस्य प्राकाम्यसिद्धिः स्याद्दीप्तिं नतभते यया ॥ यस्य वास्तंगतं चित्तं षड्विंशतिदिना
नि वै ॥ लभते जगदीशत्वं येन विभुगुरुर्भवेत् ॥ अष्टाविंशत्यहर्यस्य लयास्ति स्थिरमा
नं ॥ वशित्वसिद्धिप्राप्तिः स्याद्यया वैवश्यकृज्जगत् ॥ गंतुमिच्छन्ति ये केचित्परब्रह्मपदे ल
यं ॥ भवन्ति सिद्धयः सर्वास्तेषां विध्वंसकारि ॥ मासमेकं लयो यस्य लग्नस्तिष्ठेदखण्डितः
तः॥ न जायते स योगीन्द्रो यावन्मोक्षं स गच्छति ॥ नवमासलयेनापि पृथ्वीतत्त्वं स गच्छति
पृथ्वीतत्त्वे तु संसिद्धे योगीन्द्रो बहु सन्निभः ॥ द्वादशसंवत्सरेणापि लयस्य स्यापि योगिनः ॥ तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतत्त्वस्य सिद्धिः स्यात्तोयतत्त्वमयो भवेत् ॥ संवत्सरत्रयेणापि लयस्यास्यापि योगिनः ॥ तेज
स्तत्त्वस्य सिद्धिः स्यात्तेजस्तत्त्वमयो भवेत् ॥ षड्भिः संवत्सरैर्भूतैरखण्डलयसंस्थितः ॥ वायुत
त्त्वस्य सिद्धिः स्याद्वायुतत्त्वमयो हि सः ॥ तथा दशभिर्वर्षैर्लयस्यास्य निरंतरं ॥ व्योमतत्त्वस्य
सिद्धिः स्याद्व्योमतत्त्वमयो भवेत् ॥ चतुर्विंशतिभिर्वर्षैर्लयस्यास्य निरंतरं शक्तितत्त्वस्य सि
द्धिः स्याच्छक्तितत्त्वमयो हि सः ॥ ब्रह्माराज्यसकलं पश्येत्पारिशास्य भिवमोक्तिकं ॥ आत्मकाः
यस्वरूपं च निधाया धयथास्थितं ॥ कायस्यो दृश्यते लोके तत्त्वचर्यां समाचरेत् ॥ तत्त्वच
र्यां करोत्येव शक्तितत्त्वश्रयायत ॥ इत्थं क्रमविवृद्धेन लयाभ्यासेन योगिनः ॥ अन्ते परमा

222

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वं भगुतद्यादिमहात्म्यवत् । ब्रह्मविष्णुमहेश्वराणां प्रलये च पियोगिन ॥ भुंजते
परमानंदं भगु — दिमहात्म्यवत् ॥ अत्र योगं निरूपणानन्तरं सिद्धिकममाह
भगवान् पतञ्जलिः ॥ वैशेषिकनयेद्रव्यगुणकर्मणाम र्थ सज्ञावद्धारणा ध्यानसमा
धीनामेव विषयाणां व्यवहारलाघवाय संयम इति संज्ञां कृः तस्य संयमस्य फलमु
पयोगं च सूत्राभ्यां प्रादर्शयत् ॥ तज्जया ॥ तज्जयात्प्रज्ञालोकः ॥ तस्य भूमिषु विनियो
ग इति ॥ एतदर्थं तु ॥ तस्य संयमस्य जयाद्भ्यासेन सात्म्यापादनात् ॥ प्रज्ञाया ज्ञात
विवेकरूपायास्त्वालोकः प्रसरो भवति ॥ प्रज्ञानरागत्भृतं तेव सान्ति निर्मलप्रवाहे वस्था

३२

यो·वि· २२०

लसयाज्ञालोकोभवतीत्यर्थः॥ तस्यसंयमस्यभूमिषुस्थूलसूक्ष्मालम्बनभेदेनस्थितासुचि
त्तवृत्तिषुविनियोगःकार्य्यः अधरामधरांचित्तभूमिंजितांज्ञात्वोत्तरस्यांचित्तभूमौसंयमःका
र्य्यः॥ नह्यनभिजिताधरभूमिरुत्तरभूमौसंयमंकुर्वाणःफलभाग्भवति॥ यथोक्तस्यसं
यमस्यविषयपरीशुद्धिंकर्त्तुंपरिणामत्रयंसंक्षेपेणादर्शयन्॥ व्युत्थाननिरोध
संस्कारयोरभिभवप्रादुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामः॥ व्युत्थानंक्षिप्त
मूढविक्षिप्ताख्यंभूमित्रयं॥ निरोधःप्रकृष्टसत्त्वस्याङ्गित्वेनचेतसःपरिणामः॥ ताभ्यांव्यु
त्थाननिरोधाभ्यांजनितौयौसंस्कारौतयोर्यथाक्रममभिभवोन्यग्भूततयाकार्यकरणा

गुरु· २२०

223

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामर्थ्येनावस्थानं ।। प्रादुर्भावो वर्त्तमाने ऽध्वनि अभिव्यक्तरूपतयावस्थानं ।। तत्र निरोधाव
सरवर्त्तिनश्चित्तस्य धर्मिणोऽन्वयाद्द्वयोर्व्युत्थाननिसंस्काररूपोऽधर्म्मः तिरोभवति निरोधसत्
त्वयोः स्वरूपेणावस्थानस निरोधपरिणामः प्रथमः ।। अयमाशयः ।। यदा व्युत्थानसंस्का
ररूपोऽधर्म्मः तिरोभवति निरोधसंस्काररूपश्चाविर्भवति धर्म्मिरूपतया चित्तमुभयान्वयि
त्वेनावस्थितं प्रतीयते स निरोधपरिणामशब्देन व्यवह्रियते ।। यद्यपि चलत्वाद्गुणवृ
त्तस्य चेतसो निश्चलत्वं नास्ति ।। तथाप्येवंभूततापरिणामस्स्थैर्य्यमुच्यते ।। ए
तत्परिणामफलं तु चित्तस्य समाधिपरिणामः ।। सर्व्वार्थता तद्रूपस्य विक्षेपस्यात्यन्ति

Nepal Sanskrit University, Balmooki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥योवि॥
॥२२१॥

रस्कारादुत्पत्तिरतीते ध्वंसप्रवेशलक्षणः ॥ क्षयोनत्यन्ताभावमात्रं ॥ एकालम्बनाविष
यस्सदृशपरिणामत्वलक्षणास्यैकाग्रत्वस्योद्भवोऽभिव्यक्तिः चित्तस्योडिक्तमत्वस्यान्वयि
तयावस्थानवर्त्तमानेऽध्वनि उदकत्वमिति यावत् ॥ स समाधिपरिणामो हितीयः ॥ स्यैव
पराकाष्ठा एकाग्रतापरिणामः ॥ स यथा शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणा
मः ॥ समाहितस्यैव चित्तस्यैवं एकप्रत्ययो हृत्तिनिरोधः शान्तोतीतमध्वनप्रविष्टः ॥
अपरउदितो वर्त्तमानेऽध्वनि स्फुरितः ॥ तावपि समाहितचित्तत्वेन तुल्यो एकरूपावस्
न्वनत्वेन सदृशौ प्रत्ययौ उभयत्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं समाधिरे

॥गुरुः॥
॥२२१॥

224

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काग्रतापरिणाम इत्युच्यते ॥ एतदेवं त्रैविध्यमन्यत्रापि दृष्टं सूत्र ॥ एतेन भूतेन्द्रियेषु ध
र्म्मलक्षणावस्थापरिणामा व्याख्याताः ॥ एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेषु स्थू
लसूक्ष्मेषु इन्द्रियेषु बुद्धिकर्म्मान्तःकरणभेदेनावस्थितेषु धर्म्मलक्षणावस्थाभेदेन त्रि
विधः परिणामो व्याख्यातोऽवगन्तव्यः ॥ परिणामो नामावस्थितस्य धर्म्मिणः पूर्वधर्म्मनि
वृत्तौ धर्म्मान्तरापत्तिः ॥ तत्र धर्म्मपरिणामो यथा ॥ मृत्तादिलक्षणस्य धर्म्मिणः पिण्डरूपा
दिधर्म्मपरित्यागेन घटधर्म्मान्तरस्वीकारः ॥ तथा तस्यैव घटस्यानागताध्वपरित्यागेन व
र्त्तमानाध्वस्वीकारः ॥ तत्परित्यागेन वातीताध्वपरिग्रह लक्षणपरिणामः ॥ अवस्थापरिणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१३४

॥ यो.चि. ॥
॥ २२२ ॥

मो यथा॥ तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोस्तत्वयित्वेनावस्थानः॥ यतश्च
लक्षणानुवृत्त्या परिणाममानक्षणामप्यात्मे॥ ॥ अथ संयमवृत्तोत्पद्यमानाः सिद्धीरु
पदर्शयति परिणामत्रयसंयमादतीतानागतज्ञानं॥ उक्तस्य धर्मलक्षणावस्थारूपपरि
णामत्रयस्यास्मिन्धर्मिणि अयमस्य धर्म्मः इदं लक्षणमियमवस्था अनागतादध्वनः समेत्य
वर्त्तमाने ध्वनि स्वव्यापारं कृत्वा अतीतमध्वानं प्रविशतीत्येवं परिदृष्टविशेषेण तया
संयमकरणात् अतीतानागतं सर्वं जानाति॥ त्वरित्यादिकृतविशेषपदनिवृत्त्यैव संयमे
न नाशो सतिचित्तस्य सहजसमर्थ्यं तत्र अनाघ्रातस्य पामर्थ्यामिव्यक्तेः॥ नन्वागतस्यार्थज्ञानानाम

225

॥ पु.रू. ॥
॥ २२२ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वानामपि इतरेतराध्यासः कः शब्दः कोर्थः किं ज्ञानमिति प्रश्ने गौरित्येवरूपोत्तरदानात्
प्रसिद्धगोशब्दस्यार्थज्ञानानां गौरित्येवमेकरूपतया अभिभासः। तेन त्रैकरूपतापादना
त्संकीर्णानां योगविभागो गौरित्येव शब्दो वाचकः सास्नादिमान् पिण्डो वाच्यं ज्ञानं(
च नस्य प्रकाशकमित्येवरूपः। तस्य ज्ञेयमनेन सर्वभूतज्ञानमभिप्राय धर्माधर्मादाक्षरा
स्य संस्कारस्य सुखरागाद्युदितस्य परिचित्तस्य कायरूपस्य नास्य तु कायरूपमिभाव्य(
मानस्य शीघ्रचिरविपाकलक्षणाकर्मणो मैत्र्यादीनां हस्त्यादिवलस्य सूर्यस्य तत्त्वस्य(
स्य ध्रुवस्य संयमात् यथाक्रमं पूर्वजातिज्ञानपरिचित्तविषयविशेषणिश्चययात्वश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तिमत्त्वमपूर्वकालानवधाननियतदेशकालावच्छिन्नशरीरान्तःकरणायोगज्ञानं सर्वमित्यन्वा
द्विवत्तादिविर्भावभुवनज्ञानताराव्यूहस्य ज्योतिश्चक्रज्ञानताराणांगतिज्ञानादिभवनोक्तमुपवर्णि
तं ॥ तथाप्रवृत्त्यालोकन्यासात् ॥ सूक्ष्मव्यवहितविप्रकृष्टज्ञानमित्यनेन प्रवृत्तेर्विष
यवलक्षणायां ज्योतिष्मती लक्षणायाश्च प्रवृत्तेर्यो सावालोकः सात्त्विकः ॥
प्रसरस्तस्य निश्चलेषु विषयेषु सन्न्यासान्न तन्निविषयाणामभावनाभिःसान्तःकरणो
च्छिन्द्रियप्रकृष्टशक्तिना यत्नेषु सूक्ष्मस्य परमाणवादेर्व्यवहितस्य भूम्यन्तर्गतनिधा
नादेर्विप्रकृष्टस्य मेरुपरपार्श्ववर्तिनो रसायनादेर्ज्ञानं भवतीत्यन्येव्याख्याः सिद्धी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ःप्रदेशोऽन्यर्थ्यःनाभिचक्रेजिह्वाधस्तात्स्थितगर्त्तेकूपकण्ठकूपाख्यदेशात्तदधःस्थि

तःकूर्म्मनाडीब्रह्मरन्ध्ररूपमूर्द्धज्योतिःसंयमेभ्योयथाक्रमनाडीसन्निवेशात्मकका

यगतव्यूहज्ञानक्षुत्पिपासानिवृत्तिस्थैर्य्यसिद्धिदर्शनलक्षणाःसिद्धयप्रतिभाऽऽदिताः

तथासत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषोभोगःपरार्थात् ॥ स्वार्थसंय

मात्पुरुषज्ञानमित्यनेनसत्त्वपुरुषयोःप्रकाशसुखात्मकभोक्त्रधिष्ठानरूपयोर्ज्ज

ऽजडत्वेनाऽत्यन्तंभिन्नयोर्यः प्रत्ययस्याविशेषोऽभेदेनावभासनात्सत्त्वस्यैवक

र्तृताप्रत्ययेनयासुखदुःखसंवित्साभोगः ॥ सचसत्त्वस्यस्वार्थनैरपेक्ष्येणपरार्थःपुरु

॥ यो·वि· ॥
॥ २२७ ॥

पार्थः तस्मादन्यो यः स्वार्थः पुरुषस्वरूपमात्रावलम्बनः ॥ परित्यक्ताहङ्कारसन्वेयानिछाया
सङ्क्रान्तिः तत्र कृतसंयमस्य पुरुषविषयज्ञानमुत्पद्यते ॥ न च ज्ञाने उत्पन्नेन देवरूपञ्चा
त्वनज्ञानन्त्वनिष्ठपुरुषो जानाति न पुनः पुरुषो ज्ञाता ज्ञानस्य विषयभावमापद्यते ॥
ज्ञाप्यापत्तेरिति पुरुषे सो साक्षात्कारफलं तमिस्तूत्रारम्भकोऽत ॥ ततः प्रातिभश्रावणवेदना
दर्शास्वादवार्ता जायन्त इत्यनेन सूक्ष्माद्यर्थफलकं प्रातिभज्ञानं दिव्यशब्दज्ञानफलकं
श्रावणसंज्ञं दिव्यस्पर्शज्ञानफलकं वेदनासंज्ञं त्वगिन्द्रियज्ञानं ॥ दिव्यरूपज्ञानफलकं आद
र्शसंज्ञकं चाक्षुषज्ञा· दिव्यरसज्ञानफलकं स्वादनफलं तास्वादसंज्ञं रसनज्ञानं ॥ दिव्यगन्धज्ञा

॥ गुरु ॥
॥ २२७ ॥

227

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नकत्वाद्घ्राणेन्द्रियजन्यज्ञानं। सूक्ष्मन्तादूरवर्त्तिशब्दग्रहणाद्रूपवार्त्तास्यज्ञानरूपमित्यु
क्तानेनसमाधावुपसर्गास्तुव्युत्थानेसिद्धयइतिफलविशेषमभिधायबन्धकारणशैथि
ल्यात्प्रचारसंवेदनाच्चचित्तस्यपरशरीरावेशइत्यनेनव्यापकीभूतान्मनसोनियत
कर्म्मवशाद्देहशरीरान्तर्गतयोरेवसुखदुःखेतोममाहमस्यभोक्तेत्येवमहमिदम्मनेतिभो
ग्यभोक्तृभावेनसम्बन्धउपजायते। सचशरीरबन्धइत्युच्यते। तद्यथा। समाधिवशाद्बन्ध
कारणधर्म्माधर्म्माख्यकर्म्मशैथिल्यम्भवति। तदानेवमापद्यते चित्तस्ययोऽसौप्रचारोहृद
यप्रदेशादिन्द्रियद्वारेणविषयाभिमुख्येनप्रसरस्तस्यसम्यग्वेदनंइत्यर्थश्चित्तवहनाडीज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

३५

॥ यो॰ वि॰ ॥
॥ २२५ ॥

याश्चित्तवहन्यस्तस्मधारणाद्रिवताभ्यो नाडीभ्यो वितक्षोभोति स्वपरशरीरयोर्यत्तच्छरीरस्य संच
रं ज्ञानानितत्तपरकयशरस्तृतज्ञो बन्धुशरीरवासं चारचारेणाश्व विशति ॥ चित्तपरशरीर
विशादिन्द्रियाणापत्तवर्त्तन्ते ॥ मधुकरराजमिव मक्षिकाततः परशरीरप्रविष्टो योगी शरीरवत्ते
न व्यवहरति ॥ व्यापकत्वाच्चित्तपुरुषभोगसंकोचनिमित्तस्य कर्म्मणः समाधिनाशिथिलत्वात्
स्वातन्त्र्यात्सर्वयोगनिष्पत्तिरिति मिश्रमन्तरमभिधायउदानजयाज्जलपङ्ककण्टकाद्य
सङ्गं ॥ समानजयाद्दीप्तिर्न्देशादेशाभावलक्षणाच्छ्रोत्राकाशसम्बन्धसंयमात् ॥ सूक्ष्मव्यवहि
तशब्दादिग्राहकादिव्यश्रोत्रलाभं ॥ कायाकाशसम्बन्धसंयमात् लघुतूलादिमयभावना

॥ गुरुः ॥
॥ २२५ ॥

228

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवन्ति ॥ आकाशगमनं चोपवर्णयं बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयम्
तेन शरीराहंकारयोर्बाह्या मनोवृत्तिः साकल्पिताख्या यदा पुनः ॥ शरीराहंकारभावं परित्य
ज्य स्वातन्त्र्येण मनोवृत्तिः साकल्पिता ॥ महाविदेहाख्यानात्संयमाच्चित्तमलक्षयो भवतीति
एवं सिद्धजालमुक्तं एवं समाध्युपयोगिनी ॥ अन्तःकरणबहिःकरणलक्षणेन्द्रियभावाः
प्राणादिवायुजयभावाश्च सिद्धिर्योगिनश्चित्तस्थैर्याय समाधानोत्पत्तये प्रतिपाद्य सबीज
निर्बीजसमाधिसिद्धये विविधोपायाः सर्वे प्रदर्शिताः ॥ तानि व्याख्यासंहितानि प्रदर्शने
यथा स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ स्थूलभूतानामपरिदृश्यमानवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिष्टाकारवद्रूपं ॥ पञ्चानां भूतानां यथाक्रमं कार्कश्यस्नेहोष्णताप्रेरणावकाशदानल
क्षणाः सूक्ष्माणि कारणभूतानि तन्मात्राणि ॥ अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितयः ॥
अर्थवत्त्वं चतेष्वेव गुणेषु भोगापवर्गजसंपादनाख्या शक्तिः ॥ इति पञ्चावस्थाविभिन्नभूते
ष्वेतत्पञ्चरूपक्रमेण संयमं कुर्वन् भूतजयी भवति ॥ तथा ॥ प्रथमं स्थूलरूपे संयमं वि
धायतस्तु स्वरूपे इत्येवं क्रमेण कृतसंयमस्य संकल्पानुविधायिन्यो वत्सानुसारिणय इ
व गावो भूतप्रकृतयो भवन्ति ॥ तस्यैवं भूतजयस्य फलमाह ॥ ततोऽणिमादिप्रादु
र्भावः कायसंपत्तद्धर्मानभिघातश्च ॥ अणिमा परमाणुरूपतापत्तिः ततो वज्रादीनामप्य

229

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रादुर्भवन्ति ॥ एताश्च मधुप्रतीका उच्यन्ते ॥ यथा मधुन एकदेशोपि स्वदते तद्वदेतेष्वेव
मिताः प्रत्येकमिति ॥ अथान्तःकरणजयमाह ॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभा
वाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ तस्मिन् शुद्धे सात्त्विके परिणामे कृतसंयमनस्य सत्त्व
पुरुषयोरन्यताख्यातिर्विवेकख्यातिः गुणानां कर्तृत्वाभिमानशिथिलीभावरूपा ॥ तन्मा
त्रात्मान्नैवावस्थितस्य योगिनः सर्वभावाधिष्ठातृत्वं च सम्भवन्ति ॥ तेषां गुणा
परिणामात्मनां भावानां स्वामिवदाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव शान्तोदिताव्यप
देश्यधर्मत्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वमेषा चाशोषवशीकारसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥यो॰वि॰॥
॥१२५॥

ज्ञातायान्तस्यांविशोकानामसिद्धिरुच्यते।क्रमेणाभूमिकान्तमाह।तद्वैराग्यादपिदो
षबीजक्षयेकैवल्यम्॥विशोकायामपिवैराग्योदयेयदात्यज्यतेयोगिनः।तदातस्मादोषा
णांरागादीनांयद्बीजमविद्यादिःतस्यक्षयेनिर्मूलेकैवल्यंआत्यन्तिकीऽ।खनि
वृत्तिःपुरुषस्यगुणानामधिकारपरिसमाप्तिःस्वरूपप्रतिष्ठेत्यर्थः।अस्मिन्नेवसमाधौस्थि
तस्योपायमाह।स्थान्युपनिमन्त्रणेसङ्गस्मयाकरणंपुनरनिष्टप्रसङ्गात्॥चत्वारि
योगिनःस्थानानिभवन्ति।तत्राभ्यासवान्प्रवृत्तमात्रज्योतिःप्रथमःप्रथमकल्पिकइतिवो
च्यते।ऋतम्भरप्रज्ञोद्वितीयोमधुभूमिकइत्युच्यते।भूतेन्द्रियजयीतृतीयःप्रज्ञाज्यो

230

॥गुरुः॥
॥१२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तः प्रविशति ॥ लघिमा तूलपिण्डवद्गगनचरत्वशक्तिः ॥ महिमा महत्त्वप्राप्तिः ॥ अङ्गुल्यग्रेण
चन्द्रादिस्पर्शयोग्यता ॥ प्राकाम्यं इच्छानभिघातः शरीरान्तःकरणयोः ॥ ईशित्वं सर्व
त्र प्रभविष्णुता ॥ वशित्वं सर्वाण्येव भूतान्यनुवर्तित्वात्तदुक्तं नातिक्रामन्ति ॥ यत्रका
मावसायित्वं यस्मिन् विषये कामः इच्छा तस्मिन् विषये योगिनोऽवसायो भवति ॥ तं
विषयं स्वीकारद्वारेणाभिलाषपर्यन्तं नयतीत्यर्थः ॥ एते समा[illegible]प योगिनोऽणि
मादयोऽष्टौ गुणा महासिद्धय इत्युच्यन्ते ॥ कायसम्पदस्य लक्षणमाह ॥ रूपलाव
ण्यबलवज्रसंहननत्वानि कायसम्पत् ॥ वज्रसंहननं वज्रवत्कठिना संहतिरस्य शरीरस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।। यो·वि ।।
।। २२८ ।।

वति ।। शेषं स्पष्टं ।। तस्य कायस्य धर्म्मा रूपादयः तेषामग्निवाय्वादिना नाशो न भवति ।। ए
वम्भूतं जयमभिधाय प्राप्तभूमिकस्य इन्द्रियजयमाह ।। ग्रहणस्वरूपास्मितान्वयार्थ
वत्त्वसंयमादिन्द्रियजयः ।। ग्रहणं इन्द्रियाणां विषयाभिमुखी वृत्तिः स्वरूपं सामान्येन प्र
काशकत्वं अस्मिताहङ्कारानुगमः ।। अन्वयार्थवत्त्वे पूर्वमुक्ते ।। एषामिन्द्रियाणाम
वस्थापञ्चके न पूर्ववत्संयमं कृत्वा इन्द्रियजयी भवति ।। तस्य फलमाह ।। ततो मनोजवि
त्वं विकरणभावः प्रधानजयश्च ।। शरीरस्य मनोवदनुत्तमगतिलाभः ।। कायनिरपेक्षा
णामिन्द्रियाणां वृत्तिलाभः सर्ववशित्वमिति त्रितयफलं ।। एताः सिद्धयो जितेन्द्रियस्य

।। गुरु ।।
।। २२८ ।।

231

त्तिरितिस्मृतिकान्तभावनश्चतुर्थः ॥ तस्यचतुर्थस्यसमाध्याविभूतसप्तविधप्रान्तभूमि
प्रज्ञस्यामधुमतीसंज्ञकांभूमिंसाक्षात्कुर्वतःस्थानिनोदेवाउपनिमन्त्रयितारोभव
न्ति ॥ दिव्यस्त्रीरसायनादिढौकयन्तितस्मिन्नुपनिमन्त्रणेनसङ्गोनकर्त्तव्यः ॥ नास्मि
न्स्मयश्चसङ्गेक्रियमाणेपुनर्विषयभोगेनिपततिस्मयस्यकरणेकृतकृत्यमिवात्मानं
मन्यमानोनसमाधिमुत्सहते ॥ अतःसङ्गस्मययोस्तेनवर्जनंकर्त्तव्यं ॥ अस्यामेवफल
भूतायाविवेकख्यातेःपूर्वोक्तसंयमव्यतिरिक्तमुपायान्तरमाह ॥ क्षणतत्क्रमयोः
संयमाद्विवेकजंज्ञानं ॥ क्षणाःसर्वान्त्यःकालावयवोयस्यकलाःप्रविभक्तुन्न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।यो॰ वि॰।
।२२९।

शक्यंते तथाविधाना कालक्षणानां यः क्रमः पौर्वापर्येण परिणामः। तत्र संयमात्प्रागुक्त
म्विवेकजज्ञानमुत्पद्यते। अयमर्थः। अयंक्षणो ऽमुष्मात्क्षणाउत्तरो ऽयमस्मा
त्पूर्व इत्येवम्विधे क्रमे कृतसंयमस्यात्यन्तसूक्ष्मेपि क्षणक्रमे यदा भवति साक्षात्का
रः। तदान्यदपि सूक्ष्ममहदादि साक्षात्करोतीति विवेकज्ञानोत्पत्तिः अयमस्यैव संय
मस्य विषयविवेकोपायमाह। जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोः ततः प्रति
पत्तिः पदार्थानाम्भेदहेतवो जातिलक्षणदेशा भवन्ति। यथा गौरिति कर्बुरारुणेति जा
तिलक्षणभेदके। तुल्यपरिणामयोर्देशो भेदकः यत्र पुनर्भेदावधारयितुन्न शक्यते

।गुरुः।
।२२९।

232

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथैकदेशस्थितयोः शुक्लयोः पार्थिवयोः परमाणवोस्तथाविधे विषये क्षणसंयमस्य
दाभेदेन ज्ञानमुपजायते ॥ न तु तस्याभ्यासात् सूक्ष्माणामपि तत्त्वानि पृथ्व्यादीनि भेदेन प्र
तिपद्यते ॥ उक्तस्य विवेकज्ञानस्य संज्ञाविशेषस्वभावव्याप्त्यनुमाह ॥ तारकं सर्वविषयं
सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं ॥ उक्तसंयमबलादन्त्याभूमिकायामुत्प
न्नं ज्ञानं तारयत्यगाधसंसारपयोधेर्योगिनमिति तारकं तस्य विषयमाह ॥ सर्वाणि तत्
त्वानि महदादीनि विषयोऽस्येति सर्वविषयः स्वभावश्चास्य सर्वथाविषयत्वं ॥ सर्वा
भिरवस्थाभिः स्थूलसूक्ष्मादिभेदेन तैस्तैः परिणामैः सर्वेण प्रकारेणावस्थितानि

।यो॰वि॰।
।२३०।

तत्वानिविषयोऽस्येति। सर्वथाविषयंस्वभावान्तरमाह। अक्रमञ्चेतिनिःशेषमा
नावस्थापरिणतद्रव्यकभावग्रहेनास्यक्रमोविद्यतइत्यक्रम सर्वंकरतलामल
कवद्युगपत्पश्यतीत्यर्थः। तस्माद्विवेकजाज्ज्ञानात्किंभवतीत्याह।
सत्वपुरुषयोःशुद्धिसाम्येकैवल्य। साम्यंनत्वस्यसर्वथाकर्तृत्वाभिमाननिवृ
त्यास्वकारणेऽनुप्रवेशः शुद्धिःपुरुषस्यशुद्धिरुपचरितभोगाभावइतिद्वयोः
समानायांशुद्धौमोक्षोभवति। एवंवाभ्यामकमेणाराज्यादिमोक्षपर्यन्तानामुजा
यमानानांसिद्धिषुयोगिनानक्वापिक्वापिप्रकाशनीयानन्तेविस्मयोऽभिमानो

।राम:।
।२३०।
233

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाकर्त्तव्यस्व करतो सिद्धिर्न्नैव भवेत् ॥ तथा च दत्तात्रेयः ॥ प्रहातिनसरागारवाना
योगिना वश्यात्तथा ॥ विज्ञानम्पिवतयंयत्नितेनगोप्यः स्वहस्तय ॥ एकस्मान्निनप्रका
शनेन निष्फलं भवेत् ॥ तथा ॥ ॥ हठप्रदीपिकायां ॥ इदं विद्यापरंगोप्यायोगिना
सिद्धिमिच्छता ॥ भवेद्वीर्य्यवती गुप्ता निर्वीर्य्या तु प्रकाशितेति ॥ ॥ अथ सि
योगेनवाकालविंश्चानिम सर्व्वत्व स्पष्टस्ट आनिता निहितस्वनो ॥ तत्र सिद्धयोगेन जी
वन्मुक्तिको मेन कालवञ्चनार्थम ॥ असिद्धयोगेन तु मरणकालेस्मस्मृति उन
र्जन्मान्तरे योगप्राप्तये ॥ ॥ तथा च गीतायां ॥ यं यं वापि स्मरन्भावं त्यजत्यन्ते क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेवरः ॥ तत्तमेवेति कौन्तेय सदा तद्भावभावितः ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य वि
मुह्यति ॥ स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति ॥ कालवञ्चनविधिः ॥ प्रसं
गान्मृत्युमेवोक्तः ॥ तानि कर्माणि यथा ॥ ॥ [illegible] गरुडपुराणे ॥ वामनासापुटे यस्य वायुर्व
ति दिवानिशं ॥ अखण्डमेकं तस्यायुर्नश्यत्यब्दत्रयेण हि ॥ दक्षे [illegible] रावि
र्वहति सततं ॥ आद्येकवर्षं तस्यायुर्जीवितं नाधिकं ध्रुवं ॥ दिने नासापुटयुगे दश
हानि निरन्तरं ॥ वायुश्चेत्प्रतिमं कातराजीवितं दिनत्रयं ॥ नासावर्त्मद्वयं हित्वा मात
र्गे नाम वाद्यमनः ॥ छायेमे क्रियात तस्य स्वीकृत्य शान्तस्य ज्ञातव्यमिति ॥ दर्पणस्य मग

234

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिजन्मर्क्षस्थे निशाकरे ।। पोष्यः सकालो नेष्टव्यो यत्नाद्यामेर्शविर्भवेत् ।। अकस्मात्तस्यत
त्काले शून्यः सन्निहितो भवेत् ।। चिन्तनीयः प्रयत्नेन स कालो मृत्युभीरुणा ।। अकस्मा(
दीक्षते यस्तु पुरुषः कज्जलपिञ्जरं ।। तस्मिन्नेव क्षणे योगी रूपं जीवितमात्मनः सरवयं यस्य वी(
र्यं मलं सञ्चस्खलन्मूत्रं मलं तु वा ।। शरेकसायतेन त्वं दर्षनस्यायुरिष्यते ।। हस्तनील(
ति भं यो मित्रनागन्दन्दंयं ईक्षते ।। हृतस्मनः प्रज्वलितप्रभासंसत्तजीविनि ।। अरुन्धती
ध्रुवं चैव विष्णोस्त्रीणि पदानि च ।। आसन्नमृत्युर्नेक्षेत चतुर्थं मातृमण्डलं ।। अरुन्ध
ती भवेज्जिह्वा ध्रुवं नासाग्रमुच्यते ।। विष्णोः पादानि भ्रूमध्ये स्यान्नेत्रे मातृमण्डलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२४०

॥यो॰चिं॰॥
॥२३२॥

वेत्ति नीलादिवर्णांश्च कटुकाम्लादिकांस्तथा ॥ एकस्याः स्पृश्यथाभावश्च मासेन समृत्यु
भाक् ॥ पञ्चमासमृत्योर्धर्त्यस्य कर्णोघ्राणरसनारसाः ॥ अग्निर्विसततं तत्व स्माजिका
लातु पञ्चमाः ॥ रेजः करजने ज्ञानं नीलिमानं भजन्ति चेत् ॥ तर्हि कोनाध्वनगं रीप वे
मासिव्रजेत्स्वरः ॥ उनमान्नस्त्यमरन्ध्रस्थितं सौर्यस्य मलं दृश्यातिनस्या ॥ पञ्चमासेप
रिसङ्ग्यः ॥ मुखान्तस्योपियस्या भहृदयं परिशुष्यति ॥ चरणौ च करौ चापि त्रिमासे
नस्य जीवितं ॥ छायाप्येकस्य नैव स्याद्देहवल्भेपि निश्चले ॥ कृतानन्तहतावश्च स्नाति चतुर्थम
सितनरः ॥ मतिभ्रंशोप च स्खलनेगणीधनुरेन्द्र विरीक्षते ॥ राज्ञो चन्द्रदयश्चैव दिवाच्च बोदक्ष

235

॥गुरु॥
॥२३२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करो ॥ दिवास्मनारकाचन्द्रराज्ञौ यो मविनारकं ॥ युगपत्त्ववर्जीदेशुशाकको दशाडमगाडल
म्भृसेहेमृगराये वाग भर्घनगरालय दिवापिशावनृत्यच्च धातेप च्चल्वेहत च्च ॥ मर्वैर्घवे
तेषु विकेषु यथेकमपिवी सत ॥ न ता मासमाववधिंम सुम्प्रती क्षेतन वाधिक ॥ श्रो सतेथ
स्पनेयोहि पिशाचाम्रवाय से म्भो: श्रमिंश्म्वेगौ माथुरवरम्भकरे ॥ शरम्भेः करम्भेः
कौरैः रपनरम्बतरेववके ॥ स्व प्रेसमनौ ख्विनिम्यक्ता वर्धान्तेयमम्मौ क्षत ॥ गम्भपु घ्यां
शुके: शोरोः स्थाने तनुम्भूविलानर ॥ यः पश्येत्स्वप्नसमये सोऽस्थिमामासृजीवति ॥ पं
म्शाशि च्च वल्मीकपृष्ठ दशाडमयायिवा ॥ यो धिरोहति केन्त्व प्रेसवस्थमासेन रूपाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यो. वि.
२३३

ता सभां हृष्टमान्यानैत्तैलाभ्यक्तच मुरिक्त ॥ नीयमानं यमाज्ञायां यः फरपेन्तेच चर्वेव
न् ॥ स्वैर्मोनौ स्व बाणयपग्रेपत्य प्रगोनरः ॥ नराणां निशुम्भ कोशानिषष्ठे मास्मिन न(
र्पति ॥ तोहृदगाडधरकृ शांप्रत्युषकृ शावासमं ॥ त्वपन्यायेग्रे स्थितपरपेन्त्वीन्मा स
न्वलघयेत् ॥ कातोकुमारीयं त्वप्रेवश्री याजाकुपाशाके ॥ संमासेन समीक्षितनगरीं
शमनोषिता ॥ नरो मोवानराह्नोपायात्मा जीन्द्रिंशं स्वपन् ॥ दिनैः सपञ्चभिरेवप(
रेपन्तं यमनीपुरीं ॥ रूपशोपि नदान्यः स्याद्नन्दान्यः रूपशोयदि ॥ प्रक्रमे वि कृ(
ति अस्यानदापश्च त्वमृत्युति ॥ एतानि कालचिह्नानि संत्यन्यानि वक्तृन्यपि ॥ ज्ञात्वा

गुरु
२३३

236

ष्यमन्त्रो योगमथवा काशिकाश्रयेत् ॥ न कालवञ्चनोपायस्तुनेस्त्वन्यमेवेम्यहमिति ॥

॥ मार्कण्डेयपुराणे ॥ अभीषाकर्मवन्धश्च ज्ञात्वा मृत्युमनिश्चय ॥ उक्तानि कालेसंस्मृत्य

पुनर्योगित्वमृच्छति ॥ तस्माद्रसिद्धयोगेनासिद्धयोगेनवापुन ॥ ज्ञेयान्यरिष्टानि सदा(

येनोत्क्रान्तोनसीदति ॥ अरिष्टानिमहाराज शृणु वक्ष्यामितानिते ॥ येषामालोकनान्मृ

त्युं निजं जानाति योगवित् ॥ अरश्मिविम्वं सूर्यस्य च वह्निश्चैवाभ्यमातिन ॥ ६ स एकाद

शमासं तु नरो वर्षं स जीवति ॥ वमेन्मूत्रपुरीषं यः स्वर्णं रजतं तथा ॥ प्रत्यक्षमथ

वा स्वप्ने जीवितं दशमासिकं ॥ दृष्ट्वा प्रेतपिशाचादीन्गन्धर्वनगराणि च सुवर्णवर्ण(

५५

पो॰ चि॰ ।
२३४

तृक्षां अथ नवमासान्तजीवति । स्थूल कृशः कृशाः स्थूलो यो कस्मादेव जायते । प्रकृतेर्वि
निवर्त्तेन यस्तस्यायुश्चाष्टमासिकं । खण्डयस्य पदं पाद्योर्यो पादस्यायेथवा भवेत् । पं
थुकर्दमयोर्मध्ये सप्तमासान्तजीवति । कपोतोष्ट्रकः काको लो काय सोवापि मूर्द्ध्नि
कव्यादो वा खगस्तिष्ठेत् षण्मासायुः स दृश्यकः । हन्यते काकपक्षीभिः पांशुवर्षेणा
वानरः । पुष्पे न्वेयस्य मर्मस्थानानामादर्शनं । तस्यापि पंचभिर्मासैर्विघात्मृत्यु
मुपस्थितं । स्वाच्छायामन्यथा दृष्ट्वा चतुर्मासान्तजीवति । स्वनेत्रविद्युतं दृष्ट्वा दक्षि
णादिग्भागमास्थिता । उदके उधतत्र्वापि जीवितं त्रिमासिके । घृते तैलेन पादर्शेनो

237

गुरुः ।
२३४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि वा प्याति मनस्तनुं ॥ यः पश्येद्द्विशिरस्कं वा मासार्द्धं स जीवति ॥ यस्य वस्त्रसमो गंधो गात्रे
शवसमोऽपि वा ॥ तस्यापि मासिकं ज्ञेयं योगिनो न पजीवितं ॥ यस्यैव स्नातमात्रस्य
हृत्पस्तनमव शुष्यति ॥ पिवतश्चानलं चोष्मं दशाहं सोऽपि जीवति ॥ संभिन्नो मारुतो य
स्य मर्मस्थानानि कृन्तति ॥ न हृष्यत्यम्बुसंस्पर्शो तस्य मृत्युरुपस्थितः ॥ ऋक्षवान
रयानस्थः स्वपन्योदक्षिणां दिशं ॥ स्वप्ने प्रयाति तस्यापि न मृत्युः कालमिच्छति ॥ र
क्तकृष्णांवरधरा गायंती हसती च यम् ॥ दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति
नग्नं क्षपणकं स्वप्ने हसमानं महाबलं ॥ स्वं वा प्रेक्ष्य समये विद्यान्मृत्युमुपस्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

४५

।।योविं।। आमस्तकतलाद्यस्तु निमग्नं शोकसागरे ।। स्वप्ने प्रपश्यत्यथात्मानं स सद्यो म्रियते नरः ।। के
।।२३५।। न शरां तथा भस्म भुजगान्निर्जलां नदीं ।। दृष्ट्वा स्वप्ने दशाहात्तु मृत्युरेकादशेऽहनि ।। करा
लौर्विकटैः कृष्णो पुरुषैरुद्यतायुधैः ।। पाषाणैस्ताडितं स्वप्ने सद्यो मृत्युमवाप्नुयात् ।। सू
र्योदये यस्य शिवा क्रोशन्ती याति सम्मुखं ।। विपरीतं परीत्याथ स सद्यो मृत्युमृच्छति ।। य 238
स्य वै स्नातमात्रस्य हृदयंस्वाधनेशुष्या ।। जायते दन्तघर्षश्च स गतासुर्न संशयं ।। दीपादिगन्धं
नो वेत्ति तस्य घ्रमस्फितथा निशि ।। नात्मानं परनेत्रस्थं वीक्षते न स जीवति ।। शक्रचापमथसामे ।।गुरु।।
रात्रौ दिवेन्द्रधनुस्तथा ।। दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवित् ।। नासिकावक्रतामे ।।२३५।।

तिकर्म्मयोर्न मे नोन्नती ॥ नेत्रे च वामं त्वग्गतिर्यस्य नस्याछुरं न गे ॥ स्वारक्ता नो मे निष्ठ
स्वाञ्जिका वाप्यमिता यदा ॥ तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः ॥ इत्यस्म
भयानेन यः स्वप्ने हसि राणान्दिश ॥ प्रयाति न विजानीयात्तस्य मृत्युन्नरेश्वर ॥ पिधा
यकर्णौ निर्घोषन्न शृणोत्यसम्भवं ॥ न स्पन्दते च यश्चक्षुर्ज्योतिर्यस्य सोपि न जीवति ॥ पत
तितस्य चैव गर्त्ते स्वप्ने द्वारं पिधीयते ॥ न चोत्तिष्ठति यस्य प्रान्तं चं दत्त तस्य जीवितं ॥
ऊर्द्ध्वा च दृष्टिर्न च संप्रतिष्ठिता रक्ता पुनः संपरिवर्त्तमाना ॥ मुखस्य चोष्मा शुषिरा शिरा च ना
भिः संशन्ति पुंसामपरं शरीरं ॥ स्वप्नेग्निं प्रविशेद्यस्तु न च निष्क्रमते पुनः ॥ जलप्रवेशादपि वा

॥यो.वि.॥ ॥२३६॥

तदन्तान्तस्यजीवितम्॥ यश्चाभिरक्ष्यतेदुष्टैर्म्लेच्छैराज्ञावथादेवा॥ समुत्पन्नंसमन्तराज्ञानेनरः
प्राप्नोत्मसंशयं॥ स्ववस्त्रममनश्चलकर्मंपरपनयाःस्थितं॥ यस्मान्मृत्युमापन्नतस्यापि
हिविनिर्दिशेत्॥ स्वभाववैपरीत्यंतुग्रहहृतेश्चविपर्ययः॥ यःकथयतिमनुष्याणांसमा
सन्नोपमानकौ॥ येवाम्बिनीनःसततंयेस्यपूज्यनमासमनाः॥ तानेवस्वावजानातितानेव
विनिन्दति॥ देवान्नार्चयतेब्रह्मणान्गुरुंश्चैवंसंश्चनिंदति॥ मातापित्रोरसत्कारञ्चमान्द्द
णाकरोतिच॥ योगिनाज्ञानिविदुषामन्येषाञ्चमहात्मना॥ प्राप्तेकालेतुविदुषस्ताद्विज्ञेय
म्बिचक्षणैः॥ योगिनासततंयत्वारिष्टान्यवलोपते॥ सम्वत्सरान्तानिनिष्फलानिदिवा

239

॥गुरु:॥ ॥२३६॥

निशं ॥ विलोक्यानि सदा तेषां फलमुक्तं मनीषिणा ॥ विज्ञाय कार्य्यो मनसि सत्त्वकालो
नेश्वरः ॥ ज्ञात्वा कालं च तं सम्यगभयस्थानमाश्रितः ॥ युञ्जीत योगी कालोसौ यथानो
स्यफलो भवेत् ॥ दृष्ट्वारिष्टं तथा योगी त्यक्त्वा मरणजं भयं ॥ ततस्वभावं समालोच्य का
ले यावन्नुपागते ॥ तस्य भागे तथैवाह्नो योगं युञ्जीत योगवित् ॥ पूर्वाह्णे वापराह्णे च मध्या
ह्ने वा दिने दिने ॥ यत्र वा रजनीभागे तदारिष्टं निरीक्षितं ॥ तत्रैव तावद्युञ्जीत यावत्प्राप्तं हि
तं दिनं ॥ ततस्त्यक्त्वा भयं सर्वं जित्वा तं कालमात्मवान् ॥ तत्रैवावसथे ह्यपि परत्र च स्थैर्य्य
मैश्वर्य्यमात्मनः ॥ युञ्जीत योगी निर्जित्य त्रीन् गुणान् परमात्मनि ॥ तन्मयश्चात्मना भूत्वा

यो॰ चिं॰
२३

विभूतिमपि समन्यजेत् ॥ ततः परमनिर्वाणमतीन्द्रियमगोचरं ॥ यद्देवैर्यत्नवाप्याप्तुं शक्य
कर्तेतन्न समश्नुते ॥ ॥ अलक्ष्यामले ॥ आकाशो विगताभ्रे निशि मितपक्षेतुयः ॥ प्रतपन्ता
भोवापरयोर्लेलाऽफलकेसे कायचिज्ञास्थिरां ॥ छायायाः प्रथमं समीपनपश्यन्न
नस्तन्त्यं सर्वपश्यामि तत्र कालपुरुषं क्षीराब्धिकुन्देपमं ॥ तस्य दर्शनमात्रेण सर्वपापैः
प्रमुच्यते सम्पूर्णं च स्वयरा पश्येन्न स मृत्युभयं कुतः ॥ संपूर्णं तक्षरणापेन पश्यापश्यति
निर्मलं ॥ तस्य नाविर्यते कालो यावत्सम्वत्सरोध्रुवं ॥ शीर्षहीने भवेन्मृत्युः षण्मासात्र
संशयः ॥ बाहुहीने भवेद्व्याधिः स्यान्नाममहोदरं संशय ॥ कर्णेनवधनं नाशः स्कन्धोनि छिद्रेष्

240

गुरु॰
२३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यादिदेशस्यघातोदुर्भिक्षंवाभविष्यति॥ विकाशेचदुर्भिक्षस्याद्धीवाभ्यावपक्षयः॥
पीतवर्णेभवेत्स्तम्भःकृष्णवर्णेपमृत्यवो॥ रक्तवर्णेभवेद्राज्यंश्वेतेमोक्षजीवितं॥ तस्यद
र्शनमात्रेणपुनर्जन्मनविद्यते॥ श्वेतादिवर्णरहितंशब्दरूपविवर्जितं॥ ज्ञापयतिपरंत
त्त्वमनोवाचामगोचरं॥ गोपितोहिहरेणापिगुरोरपिनदर्शयेत्॥ दर्शनेतुफलंनास्तितु
त्तपरूपेत्त्वकालहासवतिइतिदिक्॥ निदिध्यासनमेतत्तुमयासाधनमुत्तमं॥ यथाशास्त्र
यथाबोधंसंक्षेपेणानिरूपितं॥ श्रवणामननंचैवसविशेषंसविस्तरं॥ वेदान्तेष्वेवद्रष्ट
व्यंनोक्तंविस्तरभीतितः॥ रहस्यंराजयोगस्यहठयोगस्ययत्स्थितं॥ प्रकाशितम्मयास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वं प्रीतये योगिनामिह ॥ अर्वाचीनेन माध्यत्वाल्लिखितो हि मया न सः ॥ उद्दालकभुशुं-
ड्याद्यैर्हठयोगस्तु यः कृत ॥ कपालिकप्रणीतास्तु इति कर्त्तव्यताद्वयः ॥ लिखितानया-
तेन श्रुतिस्मृतिविरोधिनः ॥ येनाराधि महादेवो गौरी ब्रह्माथवा हरिः ॥ तस्याहो रोरविष्ठापि
तस्य योगः प्रसिध्यति ॥ वाशिष्ठे ॥ पूर्वमाराधितो येन भगवानिन्दुशेखरः ॥ हरिर्ब्रह्मा
रविश्चापि स लभेदिदमद्भुतं ॥ योगचिन्तामणिर्यं चिन्तनीयो मुमुक्षुभिः ॥ जीवन्मुक्तिम-
हाकामैरजरामृतिकांक्षिभिः ॥ दुःखकूर्मनिवासजंघिशुदशाजातस्तापवार्द्धक्यजातिनिष्ठ
त्रियोगवियोगजनितोत्कर्षापकर्षोद्भवं ॥ देहप्राणवियोगरोगजभयकुम्भीविपाकादिजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ यो॰ चिं॰ ॥
॥२३६॥

नन्दुर्व्याधिमहौषधं भजत भोः ॥ श्रीयोगचिन्तामणिं द्विजमे विशास्त्वस्य श्रुतिकल्पत
रोः फलं ॥ शमनमभवृत्तपस्य योगम्भजत सततमाः ॥ ० ॥ ० ॥ इति श्रीमत्परम
हंसपरिव्राजकाचार्य्यश्रीरामचन्द्रसदानन्दसरस्वतीशिष्यशिवानन्दसरस्वतीवि
रचिते योगचिन्तामणौ चतुर्थः परिच्छेदः समाप्तः ॥ ॥४॥ ॥ इति सम्वत् १९५१ सा
लमिति श्रावण कृष्ण ४ रोज ५ शुभम् सर्व्वदा कालेमङ्गलम्भवतु शुभम् ॥ ० ॥ ० ॥ ॥ शुभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयोजनं ॥ कदलीवनमध्यस्था वह्निर्मन्त्रपराक्रमः अविवेकजनस्थाने गुणवान

४१०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu